काव्यमाला ३६.

श्रीमदप्पयदीक्षितप्रणीतं

वृत्तिवार्तिकम् ।

जयपुरवासिपण्डितशिवदत्तशर्मणा,
परबोपाह्वेन पाण्डुरङ्गतनूभुवा
काशीनाथशर्मणा च
संशोधितम् ।

तच्च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१८९३

मूल्यं ३ आणकाः ।

काव्यमाला।

श्रीमदप्पदीक्षितविरचितं

वृत्तिवार्तिकम्।

विश्वं प्रकाशयन्ती व्यापारैर्लक्षणाभिधाध्वननैः।
नयनैरिव हरमूर्तिर्विबुधोपास्या सरस्वती जयति ॥
वृत्तयः काव्यसरणावलंकारप्रबन्धृभिः।
अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः ॥
तत्र क्वचित्क्वचिद्वृद्धैर्विशेषानस्फुटीकृतान्।
निष्टङ्कयितुमस्माभिः क्रियते वृत्तिवार्तिकम् ॥

तत्र—

शक्त्या प्रतिपादकत्वमभिधा।

सा त्रिधा—रूढिर्योगो योगरूढिश्च। [तत्र—]

अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः।

तन्मात्रेण प्रतिपादकत्वं च—अवयवार्थाप्रतिभासाद्वा, तत्प्रतिभासेऽपि तस्य प्रतिपाद्ये बाधाद्वा। यथा—

'यत्ते पदाम्बुरुहमम्बुरुहासनेड्यं
धन्याः प्रपद्य सकृदीश भवन्ति मुक्ताः
नित्यं तदेव भजतामतिमुक्तलक्ष्मी-
र्युक्तैव देव मणिनूपुरमौक्तिकानाम् ॥'

अत्र मणिनूपुरादिशब्दानां नावयवार्थप्रतिभासः, अतिमुक्तशब्दस्यावयवार्थप्रतिभासेऽपि वासन्तीलक्षणे प्रतिपाद्ये तस्य बाध इत्येषां रूढिः। य-

१. मोक्षंभाजः. २. मोक्षभाजो मौक्तिकानि च. ३. 'रूढियोगापहारिणी' इत्युक्तेः.

ह्यपि 'अतिमुक्तलक्ष्मीर्वासन्तीमुकुलशोभैव मुक्तातिशायिनी संपद्' इत्य-भेदाध्यवसायार्थमतिमुक्तशब्दस्यावयवार्थोऽपि विवक्षितः, तथापि तस्य वासन्तीगतत्वेनाप्रतिपादनात्तत्र रूढिरेव । एतदव्याप्तिवारणेनैव लक्षणेऽप्येक-पदमर्थवत् ।

अवयवशक्तिमात्रसापेक्षं पदस्यैकार्थप्रतिपादकत्वं योगः ।

यथा—

'ऊर्ध्वं विरिञ्चिभवनात्तव नाभिपद्मा-
द्रोमावलीपदजुषस्तमसः परस्तात् ।
मुक्तौघमण्डितमुरःस्थलमुन्मयूखं
पश्यामि देव परमं पदमेव साक्षात् ॥'

अत्र विरिञ्चिभवननाभिपद्मरोमावलीत्यादिशब्दानां योगः ।

अवयवशक्तिमात्रेण प्रतिपादकत्वमपि—समुदायार्थाप्रतिभासाद्वा, तत्प्रतिभासेऽपि तस्यावयवशक्तिप्रतिपाद्येऽ[न]न्वयाद्वेति द्वेधा । तत्राद्यमुदाहृतम् । द्वितीयं यथा—

'अस्तु त्रयीमय तनुस्तव लम्बनाली-
रत्नैस्तथापि परिभूयत एव भानुः ।
सोढः सतां बत निशान्तमुपागताना-
मेवं तिरस्कृतिकृदीश्वर कः सुवृत्तैः ॥'

अत्र निशान्तशब्दस्य निकेतनरूपसमुदायार्थप्रतिभासेऽपि 'निशान्तं त्रियामावसानमुपगतानां सतां नक्षत्राणां तिरस्कृतिकृदन्तर्हितिकृत्, एवं गृहं प्राप्तानां सत्पुरुषाणां पराभवकृत्' इत्यभेदाध्यवसायार्थं तस्य विवक्षितत्वेऽपि त्रियामावसाने योग एव

अवयवसमुदायोभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वं योगरूढिः ।

यथा—

'पक्षद्वयकृशिमपोषविभाव्यमान-
चान्द्रायणव्रतनिषेवण एव नित्यम् ।

---

१. मौक्तिकानि. २. रूढिलक्षणे.

कुर्वन्प्रदक्षिणमुपेन्द्र सुरालयं ते
लिप्सुर्मुखाङ्करुचिमेष तपस्यतीन्दुः ॥'

अत्र सुरालयशब्दस्य 'सुराणामालयः' इत्यवयवशक्त्या समुदायशक्त्या च कनकाचले योगरूढिः। न च अस्य शब्दस्य कनकाचले रूढिरेव केवलास्तु, मा भूद्योगरूढिः, उदाहृतश्लोके तपश्चर्योत्प्रेक्षायाः प्रदक्षिणीक्रियमाणस्य कनकाचलस्यावयवशक्त्युपस्थाप्यदेवालयाभेदाध्यवसायेनापि निर्वाहात् इति वाच्यम् । तत्रैवावयवार्थसंभवेऽन्याभेदाध्यवसायरूपपरमुखनिरीक्षणायोगात् । तत्रैव यौगिकार्थप्रतिभासस्य सर्वसाक्षिकत्वाच्च । न च एवं सति देवागारसाधारणक्लृप्तावयवशक्तिमात्रेण कनकाचलेऽपि प्रवृत्त्युपपत्तेर्न तत्र समुदायशक्तिः कल्पनीया इत्यपि शङ्क्यम् । 'रत्नसानुः सुरालयः' इत्याद्यभिधानकोशस्मृतिपरम्परया विशिष्य तस्य तत्र समुदायशक्तेरपि सिद्धेः । अन्यथा देवतागार इव तत्र विशिष्यानुशासनानपेक्षणे तद्वैयर्थ्यापत्तेः । अत एवैतादृशपदे सति पुनः समुदायार्थवाचकपदप्रयोगे पुनरुक्तदोषोल्लासः । यथा—

'भद्राय भवतु भवतां भगवान्भजमानदैन्यतिमिररविः ।
दिवसारम्भविकस्वरनीरजनलिनाभिरामतरनयनः ॥'

यत्र योगरूढिमतोऽपि पदस्यावयवार्थशक्तिमूलप्रतीयमानार्थगर्भीकारेण तत्रैव विश्रान्तिः, तत्र समुदायार्थवाचकपदान्तरप्रयोगेऽपि न पुनरुक्तदोषोल्लासः । यथा—

'उद्यन्मृगाङ्करुचिकन्दलकोमलाना-
मुन्निद्रशोणनलिनोदरसोदराणाम् ।
प्राप्तुं तवाधररुचामवलोकनेन
नालं सहस्रनयनः स वृषापि तृप्तिम् ॥'

अत्र सहस्रनयनशब्दस्यावयवार्थशक्त्यावलोकनप्रकर्षसंभवप्रतीतेस्तत्रैव विश्रान्तिरिति पुनरिन्द्रवाचिपदप्रयोगः । यथा वा—

1 'समुदाहृत' ख-ग.

'तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये॥'

अत्र पिनाकपाणिशब्दस्य शिवनाम्नोऽवयवार्थशक्त्या तदायुधसारत्वप्रतीतेस्तत्रैव तस्य विश्रान्तिरिति पुनर्हरपदप्रयोगः। ननु—'कुसुमायुधोऽपि' इत्यत्रावयवार्थशक्त्या तदायुधा(ध)सारत्वप्रतीतावपि कामवाचिपदान्तरं नोपात्तम् इति चेत्, न। तत्राप्युत्तमपुरुषाक्षिप्ताहंपदस्य विशेष्यवाचिनः सत्त्वादिति साहित्यचिन्तामणिकारः। वस्तुतस्तु—नायं नियमः, यत् 'अवयवार्थशक्तिमूलप्रतीयमानार्थविवक्षायां समुदायार्थवाचिपदान्तरं प्रयोक्तव्यम्' इति, किंत्वयमपि प्रकारोऽस्तीत्युदाहृतम्। तदप्रयोगे यथा—

'मन्ये निजस्खलनदोषमवर्जनीय-
मन्यस्य मूर्ध्नि विनिवेश्य बहिर्बुभूषुः।
आविश्य देव रसनानि महाकवीनां
देवी गिरामपि तव स्तवमातनोति॥'

अत्र 'वागीश्वरीपदादवयवार्थशक्त्या प्रतीयमानस्य विद्याविषये स्वाशित्यापवादमितरवत्सरस्वती न सहते' इत्यर्थस्य वाच्यस्योपस्कारकतया विवक्षितत्वेऽपि 'वाचामधिदेवतापि यत्र भगवतः स्तोत्रे न पर्याप्तं सामर्थ्यं बिभर्ति, तत्र कथमन्येऽधिकुर्युः' इत्यर्थापत्त्यलंकारध्वननसत्त्वेऽपि पृथक्सरस्वतीवाचकपदप्रयोगः[१]। एकावलीकृतापि विशेष्यस्य साभिप्रायत्वं परिकरालंकारलक्षणमभिधाय

'नरसिंह महीपाल कीर्तिस्त्रिपथगा तव।
न कस्य भवति श्लाघ्या पुनाना भुवनत्रयम्॥'

इति तदुदाहरणे भुवनत्रयपवित्रीकरणोपपत्त्यभिप्रायगर्भं त्रिपथगापदं विशेष्यमेव प्रयुञ्जानेन तत्प्रयोगानियमो दर्शितः। तस्मात् योगरूढिमतः पदस्य यौगिकार्थशक्तिमूलप्रतीयमानार्थगर्भाकारेण समुदायार्थवाचिपदप्रयोगाप्रयोगाभ्यां द्वैविध्यमेवाद्रवम्, न पुनस्तत्प्रयोगनियमः।

१ '-योगे नि-' ख.

क्वचिद्योगरूढिमतः पदस्य विषयविशेषेऽवयवार्थानन्वयात्समुदायार्थमात्रे विश्रान्तिः। यथा—

'उल्लासयत्युदरबन्धनिबद्धदिव्य-
शोणाश्मरश्मिकलिकावलिरच्युतैषा ।
आगाम्यनेकशतकल्पविधातृगर्भ-
नाभ्युद्गताम्बुरुहकुड्मलपङ्क्तिशोभाम् ॥'

अत्राम्बुरुहपदस्य भगवन्नाभिपद्मेऽवयवार्थानन्वयाद्रूढिरेव ।

क्वचित्तु समुदायार्थानन्वयादवयवार्थमात्रे तत्र विश्रान्तिः । यथा—

'कह्लारकैरवमुखेष्वपि पङ्कजेषु
लोकेश यत्कमलमेव तथा प्रसिद्धम् ।
मन्येऽभिजात भवदास्यतुलास्य नेति
मर्मप्रकाशनमिदं विधिनैव क्लृप्तम् ॥'

अत्र पङ्कजपदस्य कुमुदकह्लारादिषु समुदायार्थानन्वयाद्योग एव ।

नैयायिकास्तु—पङ्कजादिशब्दरूपैकपदोपादानरूपान्तरङ्गप्रत्यासत्त्या[1] नाभिकमलकुमुदाद्यन्वयात्प्रागेव पङ्कजनिकर्तृत्ववैशिष्ट्येनोपस्थितस्य पद्मत्वस्य, पद्माश्रयत्वेनोपस्थितस्य पङ्कजनिकर्तृत्वस्य च नाभिकमलकुमुदाद्यन्वये नाकाङ्क्षा; न चाविशिष्टस्य तदन्वयविषयिणी शाब्दधीः, इति तदन्वयार्थं स्वतन्त्रपद्मत्वपङ्कजनिकर्तृत्वोपस्थितये पङ्कजादिपदस्य लक्षणैवाभ्युपगन्तव्या, न तु रूढिर्योगो वा । न च—प्रथमं योगरूढिभ्यां स्वार्थोपस्थाने पश्चान्नाभिकमलाद्यन्वयार्थं विरुद्धवृत्तिमूकीभावे तदितरवृत्त्यैव स्वतन्त्रपद्मत्वाद्युपस्थितेराकाङ्क्षादिसंभवान्न तदर्थमिह लक्षणा—इति वाच्यम्, केवलरूढ्यादिना स्वतन्त्रपद्मत्वाद्युपस्थित्यर्थं शब्दस्य पुनरनुसंधानकल्पनागौरवापत्तेः । लक्षणापक्षे तु नायं दोषः, पङ्कजनिकर्तृत्वसंवलितपद्मत्वरूपविशिष्टोपस्थितेर्विशेषणविशेष्यान्यतरोपस्थितिलक्षणद्वारत्वेन द्वारे सति द्वारिणः पुनरनपेक्षणात् । न च—शक्योपस्थितिर्लक्षणायामिव शक्योपस्थि-

---

१ 'रूपयान्तर' ख-ग।

त्यन्तरेऽपि द्वारम् । येन रूढ्यादिना स्वतन्त्रपद्मत्वोपस्थितावपि पुनरनुसंधानं न कल्प्येत—इत्याहुः ।

इत्थमभिधा त्रिविधा निरूपिता । सा चानेकशक्तिकस्य शब्दस्य संयोगाद्यैर्नियम्यते । तथाहुः—

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥' इति ।

अर्थः—प्रयोजनम् । प्रकरणं च वक्तृश्रोतृबुद्धिस्थता । लिङ्गं प्रयुक्तनानार्थपदवाच्यान्तरव्यावृत्तो धर्मः । शब्दस्यान्यस्य संनिधिर्नानार्थपदैकवाच्यसंसर्ग्यर्थान्तरवाचिपदसमभिव्याहारः । सामर्थ्यं कारणत्वम् । औचित्यहता । व्यक्तिः स्त्रीपुंनपुंसकम् । शेषं प्रसिद्धम् । तत्र—'शङ्खचक्रधरो हरिः' इत्यत्र शङ्खचक्रसंयोगेन हरिशब्दस्य भगवत्यभिधा नियम्यते । 'अशङ्खचक्रो हरिः' इत्यत्र तद्विप्रयोगेन । 'रामलक्ष्मणौ' इत्यत्र रामपदस्य लक्ष्मणसाहचर्याद्रघुपुंगवे । 'छायातपौ' इत्यत्र च्छायाशब्दस्यातपेन सह सहानवस्थानविरोधादनातपे । 'रामरावणयोरिव' इत्यत्र रावणेन सह वध्यघातकभावविरोधाद्रामपदस्य रामचन्द्रे । यत्तु—'रामार्जुनपदयोर्वध्यघातकभावविरोधाद्भार्गवकार्तवीर्ययोरभिधा नियम्यते—इत्युदाहरणम्, तन्न । रामपदस्य भार्गवेऽभिधानियमने सति तद्विरोधप्रतिसंधानेनार्जुनपदस्य कार्तवीर्येऽभिधानियमनम्, तस्मिंश्च सति तद्विरोधप्रतिसंधानेन रामपदस्येति परस्पराश्रयापत्तेः । तस्मादन्यतरपदस्य व्यवस्थितार्थत्व एव स्मृततद्विरोधप्रतिसंधानान्नानार्थपदस्याभिधानियमनमिति प्रागुक्तमेवोदाहरणमनुसर्तव्यम् । इदं तु शब्दान्तरसंनिधेरुदाहरणं भविष्यति । 'हरिं मोक्षाय भजत' इत्यत्र मोक्षरूपेणार्थेन हरिशब्दस्य भगवत्यभिधा नियम्यते । 'विवेश रामो दुर्धर्षं तापसाश्रममण्डलम्' इत्यत्र रामपदस्य प्रकरणाद्रघुवीरे । 'कुपितो भूभृत्' इत्यत्र कोपलिङ्गेन पर्वतव्यावृत्तेन भूभृदित्यस्य राज्ञनि । संयोगोदाहरणे प्रसिद्धिप्राचुर्यम्, शङ्खादेरिन्द्रादावर्थान्तरेऽपि सं-

योगाविरोधात् । लिङ्गोदाहरणे तु सर्वथार्थान्तरव्यावृत्तिरिति भेदः । 'निषधं पश्य भूभृतम्' इत्यत्र जनपदविशेषसाधारणस्य निषधपदस्य पर्वतवाचिभूभृत्पदसंनिधानात्पर्वतविशेषे नियम्यते । भूभृत्पदस्य च राजसाधारणस्य पर्वतविशेषवाचिनिषधपदसंनिधिना पर्वते । न चान्योन्याश्रयः । नह्यत्र समभिव्याहृतशब्देन तदर्थप्रतिपादनमभिधानियमनायापेक्ष्यते, किं तु स्वार्थेन गृहीतसंसर्गेऽर्थे व्युत्पन्नो यः शब्दः, तत्समभिव्याहारमात्रम् । तथा च यथा संबन्धिदर्शनात्संबन्ध्यन्तरस्मृतिस्थले गृहीतसंबन्धस्य संबन्धिनो दर्शनमात्रं संबन्ध्यन्तरस्मरणायापेक्ष्यते, न तु तद्दर्शनानन्तरं तत्संबन्धस्मरणमपीति नान्योन्याश्रयः, तथेहापि निषधभूभृत्पदयोरभिधानियमनाय गृहीतस्वस्वार्थव्युत्पत्तिकभूभृन्निषधशब्दसमभिव्याहारमात्रमपेक्ष्यत इति तत्तदर्थप्रतिपादनस्यानपेक्षणान्नान्योन्याश्रयः । नन्वेवं 'शङ्खचक्रधरो हरिः' इत्यादावपि शङ्खचक्रादिशब्दान्तरसंनिधिनैवाभिधानियमनं भविष्यतीति व्यर्थं पृथक्संयोगाद्युदाहरणम्—इति चेत्, मैवम् । तत्र शङ्खचक्रादिशब्दानां नियतार्थतया श्रवणमात्रादर्थप्रतिपादकत्वेन तत्प्रतिपादितार्थसंयोगादिभिरभिधानियमनसंभवात् । 'शब्दान्तरसंनिधिरपि तत्रास्ति' इति चेत् । अस्तु, तथापि हरिशब्दाद्यभिधानियमनसमर्थे तदर्थसंयोगादिरूपसंनिहितसंबन्धेनान्तरङ्गे शङ्खचक्रादावुपस्थिते तत्रापि वाचकतया व्यवहितसंबन्धेन बहिरङ्गशब्दान्तरसंनिधिर्नोदाहरणत्वमर्हति । असौ यत्र 'निषधं पश्य भूभृतम्' इत्यादावुभयस्य नानार्थतया न कस्याप्यर्थस्य प्रथममुपस्थितिः, तत्रैव बहिरङ्गस्यापि तस्य नियामकत्वेनोदाहरणमिति न कश्चित्संकरः । यत्तु—नियतार्थशब्दसामानाधिकरण्यं शब्दान्तरसंनिधिः, तेन च 'देवस्य त्रिपुरारातेः' इत्यत्र देवशब्दस्य शंकरे नियमनम्, तत्र त्रिपुरारातिशब्दस्य नियतार्थत्वात् इति, तदयुक्तम् । समभिव्याहृतशब्दस्य नियतार्थत्वे तत्प्रतिपादितलिङ्गादिनैव तन्नियमनात् । अन्यथा लिङ्गाद्युदाहरणेऽपि शब्दान्तरसंनिधेरेव नियामकत्वापत्तेः । न च 'सामानाधिकरण्ये शब्दान्तरसंनिधिः, वैयधिकरण्ये 'भूभृतः कोपः' इत्यादिरूपे लिङ्गादिकम्' इति भेदकथनम् ।

उभयत्र शब्दप्रतिपादितलिङ्गादेरेव नियामकत्वेनास्य भेदकथनस्य परिभाषामात्रत्वात्। 'व्यालो दानेन राजते' इत्यत्र व्यालदानपदयोरुभयोरप्यनियतार्थत्वेऽपि वैयधिकरण्येऽपि परस्परसमभिव्याहारेण दुष्टगजमदजलयोरभिधानियमनस्य सर्वानुभवसिद्धत्वेनावश्यसंग्राह्यत्वात्तदसंग्रहेण लक्षणकथनस्यात्यन्तायुक्तत्वाच्च। तस्मादस्मदुक्तैव शब्दान्तरसंनिधेः प्रक्रियादरणीया। 'मधुना मत्तः कोकिलः' इत्यत्र कोकिलमदकारणत्वरूपेण सामर्थ्येन वसन्ते मधुशब्दस्याभिधा नियम्यते। 'भजत हरिं भवतापखिन्नाः' इत्यत्र भवतापहरणौचित्येन हरिपदस्य लक्ष्मीरमणे। अर्थोदाहरणे चतुर्थ्या कार्यत्वनिर्देशः, सामर्थ्योदाहरणे तृतीयया करणत्वनिर्देशः, औचित्योदाहरणे तदुभयानिर्देशेऽपि योग्यतामात्रेण समभिव्याहारलभ्यकार्यकारणभावावगमः, इति भेदः। 'क्षीरार्णवे हरिः शेते' इत्यत्र देशेन, 'प्रलये तिष्ठति हरिः' इत्यत्र कालेन च गरुडध्वजे हरिपदस्य नियम्यते। 'मित्रो भाति' इत्यत्र पुंव्यक्त्या तपने सुहृद्वाचिनो नपुंसकत्वात्। 'तिस्र एव सायाह्नस्योपसदः, द्वादशाहीनस्य' इति श्रुतावहीनपदस्य मध्योदात्तस्वरेणाहर्गणसाध्यसुत्याके द्वादशाहाख्यक्रतुविशेषे, 'अह्नः खः क्रतौ' इत्यनुशासनात्। 'हीनो न भवति' इति नञ्समासे सत्यहीनपदस्याद्युदात्तत्वात्। आदिशब्देनाभिनयोपदेशौ गृह्येते। अभिनयो विवक्षितार्थाकृतिप्रदर्शको हस्तादिव्यापारः। उपदेशो विवक्षितार्थस्य शृङ्गग्राहिकया निर्देशः।

> 'परारिसंदर्शितसंनिवेशौ परुत्पराभूतसरोजकोशौ।
> इमावियन्तौ पुनरेषमस्ते कुचौ कियन्तौ परतो भवेताम्॥'

इत्यत्र तत्कालस्तनपरिमाणप्रदर्शकहस्तव्यापारेणेयत्पदस्य परिमाणविशेषे,

> 'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
> विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्॥'

इत्यत्र 'इतः' इति स्वात्मनिर्देशेन तस्य वक्तरि परमेष्ठिन्यभिधा नियम्यते।

यत्र त्वनेकशक्तस्य शब्दस्याभिधानियामकमनेकत्राविशिष्टमर्थे, तत्र नान्यतरस्मिन्नभिधा नियम्यते। यथा—

---

१. 'मनेकत्र प्रविष्ट' क.

'येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो,
यश्चोद्वृत्तभुजङ्गहारवलयोगङ्गां च योधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥'

अत्र शिवकेशवयोरपि स्तुत्यतया प्रकरणमविशिष्टम् । अतः—'ध्वस्तमनोभवेन नाशितमन्मथेन बलिजित्कायो विष्णोर्विग्रहः पुरेष्वस्त्रतां नीतः, यश्चोद्वृत्तशेषवासुकिप्रभृतिनागराजसंपादितहारवलयकृत्यः, यश्च गङ्गामधारयत्, यस्य शिरः शशिमदाहुरमराः स्तुत्यं नाम च हर इत्याहुः, अन्धकासुरक्षयकरः, स उमाधवस्त्वां सर्वदा पायात्' इति, 'अभवेन निःसंसारेण येन अनः शकटं ध्वस्तम्, येन च बलिजित्स्वस्य कायः पुरामृतमथने स्त्रीत्वं नीतः, यश्चोद्वृत्तं भुजङ्गं कालीयं हतवान्, रवे शब्दब्रह्मणि लयस्तद्रूप्यापत्तिरस्येति रवलयः, उद्वृत्तभुजङ्गान्हतवदारवलयं चक्रमस्येत्येकं पदं वा, अगं गोवर्धनं गां वराहावतारेण भूमिं च योऽधारयत्, यस्य स्तुत्यं नाम शशिमच्छिरोहर इत्याहुः शशिनं मथ्नाति यो राहुस्तच्छिरोहर इति, अन्धकानां राज्ञां क्षयकरो निवासकृत्, सर्वदो माधवस्त्वां पायात्' इति चार्थद्वयेऽप्यभिधैव व्यापारः । अत एवात्र श्लेषोऽलंकारः ।

ननु च यत्रानेकत्र प्रकरणाद्यविशिष्टम्, तत्र भवत्वनेकत्राप्यभिधाव्यापारः । यत्र प्रकरणस्य क्वचिदर्थेऽवस्थितत्वेऽप्यप्राकरणिकं शक्यान्तरं प्रतीयते, तत्र का गतिः । यथा—

'असावुदयमारूढः कान्तिमान्रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥'

इति चन्द्रोदयवर्णनप्रस्तावे । अत्र ह्यप्राकरणिको भूपतिरभ्युदयादिविशिष्टः प्रतीयते ।

अत्र प्राञ्चः—'तत्र शब्दशक्तिमूलो व्यञ्जनाव्यापार एव शरणम्, गत्यन्तराभावात् । न हि तस्य तत्राभिधा संभवति तस्याः प्रकरणेन नियन्त्रितत्वात् । नापि लक्षणा मुख्यार्थबाधाद्यभावात् । न चाभिधाया इव व्यञ्जनस्यापि प्रकरणेन नियन्त्रणे तेनापि न तन्निर्वाहे इति वा-

च्यम्, तस्य धर्मिग्राहकमानेन तदनियम्यतयैव सिद्धेः अत एव काव्यान्तर्निविष्टस्य प्राकरणिककिंचिदर्थनियताभिधाव्यापारस्याप्यसम्यपदार्थान्तरप्रत्ययहेतोः पदस्य हेयत्वम् । अन्यथा तत्राभिधाया इव व्यञ्जनव्यापारस्यापि प्रकरणेन नियन्त्रणेऽसभ्यार्थान्तरप्रत्ययासंभवात् 'यस्याननं योनिरुदारवाचाम्' इत्यादावश्लीलदोषो न स्यात् । तस्मात्संयोगादिभिरभिधाशृङ्खलिता यत्र कुण्ठतामेति, अर्थान्तरावगमने व्यञ्जनमेव क्षमं तत्र—' इति ।

वयं तु ब्रूमः—'असावुदयमारूढः–' इत्यादौ प्राकरणिकेऽर्थे प्राकरणिकवदप्राकरणिकेऽपि राजकरमण्डलादिशब्दानां परस्परान्वययोग्यनृपतितद्ग्राह्यधनदेशादिवाचकानां समभिव्याहाररूपमभिधानियामकमस्तीत्यर्थद्वयस्यापि प्राकरणिकत्व इव' प्राकरणिकाप्राकरणिकरूपत्वेऽप्युभयत्राभिधैव व्यापारः, यथोक्तसमभिव्याहारस्यापि शब्दान्तरसंनिधिरूपत्वेन प्रकरणवदभिधानियामकत्वात् । यैस्तु शब्दान्तरसंनिधिरन्यथा निरुच्यते, तैरपि यथोक्तसमभिव्याहारेण नानार्थशब्देभ्योऽर्थप्रत्ययस्य सर्वसिद्धत्वेन तस्य तद्भेदेनापि नियामकत्वमास्थेयमेव । वस्तुतोऽयमेव शब्दान्तरसंनिधिरित्यप्युक्तम् । न चाप्राकरणिके उक्तरूपशब्दान्तरसंनिधिमात्रम्, प्राकरणिके तच्च प्रकरणं चेति नियामकाधिक्यात्तत्रैवाभिधा स्यादिति वाच्यम्, प्रकरणादीनामभिधानियामकत्वं हि नानार्थशब्दजन्यशक्यस्मृतौ तेषामन्यतमकारणत्वम् । यथोक्तम्—'शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः' इति । तथा च तेषु कस्यचिदपि समवधाने स्मृतिसामग्री पुष्कलैवेति किं तद्बाहुल्येन।

यत्रैकमेव पदं नानार्थमप्राकरणिकेऽपि तात्पर्यवत् । यथा—

'करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तुतिम्[2] ।
हरे[3] हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया ॥'

इत्यत्र हरिपदम् । तत्रापि समभिव्याहृतद्विपपदप्रतीतगजविरोधादिकमप्राकरणिके सिंहेऽप्यभिधानियामकमस्त्येव ।

१. 'काव्यान्तरनिविष्टस्य' ख. २. 'स्तवम्' ख. ३. 'हरोहर' क.

यत्र तु 'यस्याननं योनिरुदारवाचाम्–' इत्यादावश्लीले नैतादृशं नियामकम्, तत्रापि बुभुत्सितार्थव्यासक्तस्य मनसस्तमुल्लङ्घ्यासभ्ये दुर्गन्धादौ प्रवृत्तिवत्प्रकरणनियन्त्रितस्यापि शब्दस्य तदुल्लङ्घ्यविषयस्वाभाव्यादश्लीले प्रवृत्तिरिति न क्वापि शक्तिविषये व्यक्तिरङ्गीकरणीया । यदि चैवंविधानि नियामकानि नाद्रियेरन्, तदोदाहृतस्थलेषु व्यञ्जनव्यापारोऽपि दुर्ग्रहः । तथा हि । प्रकरणादिकमुल्लङ्घ्य व्यञ्जनव्यापारेणाप्यर्थान्तरप्रत्ययो न सर्वत्र वक्तुं शक्यते, प्रकरणादीनामभिधानियामकत्वकल्पनस्यैव व्यर्थत्वापत्तेः । तद्धि नादृष्टार्थम्, किंतु 'सैन्धवमानय' इत्यादावेकार्थमात्रपरनानार्थशब्दस्थले अर्थविशेषस्मृतिव्यवस्थार्थं तत् । यदि तत्रापि व्यञ्जनव्यापारेणार्थान्तरप्रत्ययः स्यात्, तदा कथमेषा सिध्येत् । नह्यभिमतानभिमतक्षेत्रसाधारणस्य जलाशयस्याभिमतक्षेत्रगामिनीमेकां कुल्यां विधायानभिमतक्षेत्रगामिनः कुल्यान्तरस्यापि कल्पने जलस्याभिमतक्षेत्रैकगामित्वव्यवस्था कृता भवति । तथा च यत्र कवयितुश्चमत्कारायाप्राकरणिकेऽप्यर्थे तात्पर्यम्, यत्र वाश्लीलदोषः, तत्रैव व्यञ्जनाव्यापारोन्मेषः, न सर्वत्रेति तद्व्यवस्थासिद्धये तत्र तत्र नियामकान्यस्मदुक्तानि अन्यादृशानि वावश्यमादर्तव्यानि तेषां चाभिधानियामकत्वमेव वक्तुं शक्यमिति व्यर्थस्तत्र व्यक्तिकल्पनापरिश्रमः, दुर्वारश्च तत्र व्यक्तिवादिमतेऽप्यभिधाव्यापारः । तथा हि । यदि शक्तिरभिधा, निर्विवादमस्त्येवाप्राकरणिकेऽपि सा । यदि च काव्यप्रकाशिकाद्युक्तरीत्या शक्यार्थप्रतिपादकत्वरूपः शब्दव्यापारः, सोऽप्यस्त्येव । नहि तत्राप्राकरणिकशक्यप्रतिपत्तेः शब्दादन्यज्जनकम् । शक्तिग्रहमपेक्ष्य तत्प्रतिपादकत्वमभिधा इति चेत् । अ(य)त्राप्राकरणिकोऽर्थः, तत्रागृहीतशक्तिकस्याभिधया किं न प्रतीयते, येन स तत्र न स्यात् । ननु शक्त्या साक्षात्प्रतिपादकत्वमभिधा । साक्षादित्यविशेषणं मुख्यार्थशक्तिग्रहमपेक्ष्य तत्प्रतिपादनव्यवधानेन तत्संबन्ध्यर्थान्तरप्रतिपादनरूपाया लक्षणाया अप्यभिधात्वप्रसङ्गात् । तथा च प्रागेवानुवर्तमानेन[1] प्रकरणेन तत्प्रमेयोपस्थापनं शीघ्रभावीति तद्व्यवधानेनार्थान्तरप्रतिपादनं नाभिधा

१. 'प्रागेवार्थमनुवर्त' ख-ग.

इति चेत्, न। 'तद्विषयशक्तिग्रहमपेक्ष्य तत्प्रतिपादनमभिधा' इति लक्षणं विनैव साक्षात्त्वविशेषणं साधु । अनतिप्रसङ्गात् । तत्पदरूपेण पदभङ्गकृतपदान्तररूपेण वार्थान्तरप्रतिपादनव्यवधानाभावरूपसाक्षात्त्वविशेषणस्य गुरुत्वात् । तथाविशेषणे 'येन ध्वस्तमनोभवेन-' इत्यादौ धूर्जटिपक्षे—स्फुटपदसंबन्धितया प्रसिद्धिप्राचुर्येण च झटित्यर्थप्रतिपत्तिः, वैकुण्ठपक्षे—'येन ध्वस्तमनोभवेन-' इत्यादावस्फुटपदसंनिधि(बन्धि)तया 'शशिमच्छिरोहरः, अन्धकक्षयकरः' इत्यनयोरप्रयुक्तनिहतार्थत्वेनाप्रसिद्धतया च विलम्बेन प्रतिपत्तिरिति सर्वसिद्धत्वेन तत्राभिधाविषयेऽपि तदभावापत्तेः । प्रकृताप्रकृतोभयपरे यत्राप्रकृते प्रसिद्धतरम्, प्रकृतेऽप्रसिद्धतरं पदम्, तत्र प्रसिद्धिप्राचुर्येणाप्रकृतार्थप्रतीतेरेव प्राथमिकत्वेनाप्रकृतेऽभिधा, प्रकृते व्यक्तिः' इति वैपरीत्यापत्तेश्च । प्रकरणमुल्लङ्घ्यापि प्रसिद्धतरार्थस्यैव प्रथमं स्मृतेः । अत एव—'द्व्यार्थमप्रसिद्धेऽर्थे प्रयुक्तं निहतार्थकम्' इत्युक्तलक्षणस्य निहतार्थस्य काव्यदोषत्वमुपगम्यते । प्रसिद्धतराप्रकृतार्थप्रतीत्या प्रकृतार्थप्रतीतेर्व्यवधानात् । न च निहतार्थस्य दोषत्वात्तत्प्रयोगोऽर्थद्वयविवक्षास्थलेऽपि काव्ये न संभवति इति वाच्यम्, श्लेषयमकादिषु तस्य वृद्धैर्दोषत्वाभावस्योपपादितत्वात्[1] । 'अन्धकक्षयकरः,' 'राजा हरति लोकस्य', 'राजा राजार्चिताङ्घ्रेरनुपचितकलो यस्य चूडामणित्वम्' इत्यादिदर्शनाच्च । तस्माच्छब्दस्यार्थप्रतिपादनोपयोगितत्प्रत्यासत्तिरूपधर्मभेद एव वृत्तिभेदप्रयोजको न तु तद्भेदाभावः । प्रतिपादनगतसाक्षात्त्वव्यवहितत्वभेदे सत्यपि शक्तिशक्यसंबन्धरूपप्रतिपाद्यप्रत्यासत्तिभेदेनैवाभिधालक्षणयोर्भेददर्शनात्, तद्भेदाभावे प्रसिद्धाप्रसिद्धार्थगोचरशब्दश्लेषस्थले लक्षितलक्षणास्थले व्यङ्ग्यस्थले चार्थद्वयप्रतीत्योः साक्षात्त्वव्यवहितत्वभेदे सत्यप्यभिधालक्षणाव्यक्त्यतिरिक्तवृत्त्यदर्शनाच्च, इत्यप्रयोजकस्याव्यवस्थापादकस्य च साक्षात्त्वविशेषणस्यायोगात् 'तद्विषयशक्तिग्रहमपेक्ष्य तत्प्रतिपादकत्वमेवाभिधा' इत्यप्रकृतेप्यर्थेऽभिधाव्यापारो दुर्वारः ।

---

१. 'दोषत्वस्यापोदितत्वात्' ख.

नैयायिकास्तु—प्रसिद्धिप्राचुर्ये सति प्रकरणादिशून्यस्याप्यर्थस्य स्मृतेः, प्रसिद्ध्यभावे प्रकरणादिमतोऽप्यस्मृतेश्च, प्रकरणादिकं नाभिधानियामकम् । शक्तिग्रहसंस्कारपाटवमात्रनियम्यत्वात्तस्याः । किंतु लिङ्गविधया तात्पर्यग्राहकम् । अत एव 'हरिरस्ति' इत्यनारम्यवादश्रवणेऽपि हरिशब्दस्यार्यमानिलेन्द्रचन्द्रादयोऽर्था इत्यवधार्यते एव वक्तुः क्व तात्पर्यमिति नावधार्यते—इत्याहुः ।

तद्रीत्या न कथंचिदपि प्रकरणाप्रकरणादिनाभिधानियमनं शक्यशङ्कम् । तस्मात् प्रस्तुताप्रस्तुतोभयपरेऽपि प्रस्तुताप्रस्तुतोभयवाच्यार्थेऽभिधैव वृत्तिः । तदुपस्थितेषु च पदार्थेष्वाकाङ्क्षादिसहकारिवशादुभयविधवाक्यार्थप्रत्ययः, इत्यप्रस्तुतविषये न पदार्थप्रतीतये नापि वाक्यार्थप्रतीतये व्यक्तिरुपगन्तव्या । यत्तु प्राचामप्रस्तुते[1] शक्तिमूलव्यञ्जनवृत्त्यभिधानम्, तदप्रस्तुतार्थप्रतीतिमूलके यथा 'उदयमारूढः–' इत्यादिविशेषणविशिष्टः पृथिवीपतिः स्वल्पैर्ग्राह्यधनैर्लोकस्य हृदयं रञ्जयति, एवं तथाभूतश्चन्द्रमा मृदुलैः किरणैः । इत्यादिरूपेण प्रतीयमाने उपमाद्यर्थालंकारे तद्वश्यंभावदृढीकरणाभिप्रायेण । न तु तत्रापि वस्तुतो व्यञ्जनव्यापारास्तित्वाभिप्रायेण ।

> 'आच्छादितायतदिगम्बरमुच्चकैर्गा-
> माक्रम्य च स्थितमुदग्रविशालशृङ्गम् ।
> मूर्ध्नि स्खलत्तुहिनदीधितिकोटिमेन-
> मुद्वीक्ष्य को भुवि न विस्मयते नगेशम् ॥'

इत्यादिना शब्दशक्तिमूलस्यालंकारध्वनेरेवोदाहरणत्वेन तैरपि लिखितत्वात् ।

'उपोढरागेण[2] विलोलतारकं तथा गृहीतं शशिना निशामुखम् ।'

इति श्लेषापादितविशेषणसाधारण्यनिमित्तसमासोक्त्यलंकारोदाहरणे रागादिशब्दानामप्रस्तुतेऽप्यभिधावृत्तेरेव श्लेषव्यवहारेण स्फुटीकरणाच्च ।

न च अत्र स्वतोप्रस्तुतयोरपि कामिनोः प्रस्तुतशशिनिशावच्छेद[3]-

---

१. 'प्राचां प्र' क; 'प्राग्वामप्र' ख; 'प्राच्ञामप्र' ग. २ 'रागेण' ख-ग. ३ 'च्छेदकत्वेनानन्वयात्तत्र' क.

कत्वेनान्वयान्न तत्र तयोः सर्वथैव प्रकरणासंभवः—इति वाच्यम्, 'विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति लक्षणानुरोधेनाप्रस्तुतप्रतिपत्तेर्विशेषणसाम्याधीनत्वेनाप्रस्तुतस्य प्रकरणसंबन्धावगमात्प्रागेव तद्विशेषणेष्वभिधाया वाच्यत्वात्। प्रस्तुतोपमानत्वादिना यथाकथंचिद्भाविप्रकरणसंबन्धस्येहापि सद्भावाच्च। सर्वथाप्रस्तुतासंबन्धस्याप्रस्तुतस्य क्वापि कविवक्ष्यमाणगोचरत्वाभावात्।

नन्वेवम्—शब्दशक्तिमूलस्यालंकारध्वनेः 'आच्छादितायतदिगम्बरम्—' इत्याद्युदाहरणसत्त्वेऽपि तन्मूलो वस्तुध्वनिर्लुप्येत, निरलंकारेऽप्रस्तुतार्थ एव वस्तुध्वनेरुदाहरणीयत्वात्, तत्र च त्वयाभिधाङ्गीकारात्—इति चेत्, न। यत्राप्रस्तुतेऽर्थेऽभिधयैव प्रतिपाद्यमाने तन्मूलमनभिधेयं वस्तु प्रतीयते तत्र तदङ्गीकारात् इति। यथा—

'शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्।'

इति। अत्र ह्यशनिशब्देन प्रस्तुताद्वज्रादन्यस्मिन्समभिव्याहृतशनिविरुद्धरूपेऽप्यर्थेऽभिधयैव प्रतिपाद्यमाने 'विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुतः' इत्युपश्लोक्यस्य प्रभावातिशयः प्रतीयते। इत्थमेव प्राचीनैरपि शब्दशक्तिमूलो वस्तुध्वनिरुदाहृतः।

ननु—

"'भ्रमिमरतिमलसहृदयतां प्रलयं मूर्छां तमः शरीरसादम्।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम्॥'

इत्यत्र विषपदेनाप्रस्तुतं गरलं व्यङ्ग्यं वाच्यस्य 'जलद एव भुजगः' इति रूपकस्य सिद्धिकृदिति वाच्यसिद्ध्यङ्गं गुणीभूतव्यङ्ग्यमुदाहरता मम्मटाचार्येणाप्रस्तुते शक्येऽपि शब्दशक्तिमूलो वस्तुध्वनिरुक्तः। सत्यम्। अप्रस्तुतार्थप्रतीतिमूलतया प्रतीयमानयोर्वस्त्वलंकारयोर्व्यक्त्यवश्यंभावदार्ढ्यायाश्रितम् 'अप्रस्तुतार्थेऽपि व्यक्तिः' इति प्रौढिवादमात्रमवलम्ब्य तत्प्रवृत्तमिति नात्राभिनिवेशः कार्यः।

---

१. 'प्रकृ[त]भावा' ख; 'प्रस्तुतभावा' ग. २. 'तत्सत्यम्' ग.

ननु—एवं प्रस्तुतार्थपर्यालोचनालभ्ययोरेव वस्त्वलंकारयोर्व्यक्त्युपगमे तत्रार्थशक्तिमूलैव व्यक्तिर्भवेदिति पृथगर्थशक्तिमूलध्वनेः शब्दशक्तिमूलो न स्यात्—इति चेत्, मैवम् । तथात्वेऽपि प्रस्तुताप्रस्तुतोभयसाधारणशब्दसापेक्षतया प्रस्तुतमात्रापरपर्यायशब्दान्तपरिवृत्त्यसहिष्णुत्वेन ततस्तस्य पृथग्व्यवस्थितेः एवमन्येऽप्यप्रस्तुतशक्ये व्यक्त्यनुपगमे संभाविताः क्षुद्रोपद्रवा निरसनीयाः ॥

इत्यप्पदीक्षितविरचिते वृत्तिवार्तिके मुख्यवृत्तिनिर्णयो नाम प्रथमः परिच्छेदः ।

अथ लक्षणा निर्णीयते ।

सा च मुख्यार्थसंबन्धेन शब्दस्य प्रतिपादकत्वम् ।

तत्सादृश्येन प्रतिपादकत्वरूपा गौण्यपि लक्षणाप्रभेद एव, तत्सदृशेऽपि तन्निरूपितसादृश्याधिकरणत्वपरम्परासंबन्धसत्त्वात् । नहि 'साक्षात्संबन्धे विशिष्टबुद्धियोग्यसंबन्धे वा सत्येव लक्षणा' इति नियमः, चक्षुरादेर्घटनेत्यादिषु संयुक्तसमवायादिवद्विशिष्टबुद्ध्ययोग्यस्य परम्परासंबन्धस्यापि प्रत्यासत्तित्वोपपत्तेः, व्यतिरेकलक्षणास्थले तन्निरूपितविरोधाधिकरणत्वादिपरम्परासंबन्धमात्रेण तादृशेन लक्षणाक्लृप्तेश्च । एतेन—सादृश्यं न संबन्ध इति गौणी लक्षणातो भिन्ना, विशिष्टधीयोग्यस्यैव संबन्धत्वात् । संयोगे सति 'दण्डी देवदत्तः' इतिवत्सत्यपि सादृश्ये 'सिंहवान्देवदत्तः' इति विशिष्टबुद्धेरदर्शनात्—इति निरस्तम् । विशिष्टबुद्ध्यनियामकपरम्परासंबन्धमात्रस्य प्रत्यासत्तित्वोपपत्तेस्तावता लक्षणाक्लृप्तेश्च दर्शितत्वात् ।

तस्मात्—सादृश्यगर्भतदन्यसंबन्धनिमित्ततया गौणी शुद्धा चेति लक्षणाया एव द्वैविध्यम् ।

इयं च द्विविधापि लक्षणा प्रत्येकं द्विविधा—निरूढलक्षणा फललक्षणा च । रूढितुल्यतया निरूढलक्षणा । विवक्षितार्थान्तरद्योतनफला फललक्षणा । आद्या यथा—

'लावण्यसागरभुवि प्रणयं विशेषा-
दुग्धाम्बुराशिदुहितुस्तव तर्कयामि ।

१. 'एवमप्रस्तु' ग. २ 'शब्दमूलो' ख-ग. ३. 'मात्रपर' ख. ४ 'इति वृत्ति' ख-ग.

यत्तां बिभर्षि वपुषा निखिलैः प्रतीकै-
रन्यां तु केवलमधोक्षज वक्षसैव ॥'

"अत्र लावण्यशब्दस्य लवणत्ववाचिनो हृदयंगमत्वसादृश्यात्सुषमावि- रूढिलक्षणा। एवमालेख्यगजादौ गजादिशब्दस्यापि रूढिलक्षणानुसंधेय इदं गौण्या उदाहरणम्। शुद्धा यथा—

'क्वणद्विरेफावलिनीलकङ्कणं प्रसार्य शाखाभुजमाम्रवल्लरी।
कृतोपगूढा कलकण्ठकूजितैरनामयं पृच्छति दक्षिणानिलम् ॥'

अत्र द्विरेफशब्दस्य 'द्वौ रेफौ यस्य' इति व्युत्पत्त्या भ्रमरशब्दवृत्तेर द्वाच्ये रूढिलक्षणा। एवं त्वगादिशब्दानां त्वगिन्द्रियादिष्वपि शुद्धा र ढिलक्षणा द्रष्टव्या।

(फललक्षणा यथा—) जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा सारोपा साध्यवसाना च। शुद्धा च गौणी च। इत्येवं सप्तविधा फललक्षणा

जहल्लक्षणा यथा—

'त्वत्पादपद्मसुषमानुकृतिक्षमाणि
प्राप्तं प्रवालपदभाञ्जि विभूषणानि।
वल्कावृता धृतजटाः सुरदीर्घिकायां
कल्पद्रुमाः कति गिरीश तपश्चरन्ति ॥'

अत्र सुरदीर्घिकापदस्य कल्पद्रुमाधिकरणत्वयोग्ये तत्तीरे लक्षणा। मु- ख्यार्थस्य तदधिकरणत्वेनान्वयाभावाज्जहल्लक्षणा। कल्पद्रुमाणां तपश्चर्यो- त्प्रेक्षोपस्कारकं तीरस्यातिशयितपावनत्वद्योतनं फलम्।

एवं 'गङ्गायां घोषः' इति प्रसिद्धोदाहरणमप्यनुसंधेयम्। तत्र गो- स्वामिनः प्रीतये तीरस्याधिकशैत्यद्योतनं फलम्।

व्यतिरेकलक्षणापि जहल्लक्षणाप्रभेद एव। यथा—

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥'

---

१. 'तत्राद्या त्रिविधा—शुद्धैव सारोपा साध्यवसाना च। फललक्षणा यथा—' क.
२. 'यथा मास्ति' ग.

अत्रापकारिण्यन्वयायोग्ये उपकृतादिपदैः स्वार्थविरुद्धे लक्ष्यते । 'त्वयापकारे क्रियमाणेऽपि मयैवं प्रियमेवोच्यते' इति स्वसाधुत्वद्योतनं फलम्।

अजहल्लक्षणा यथा—'कुन्ताः प्रविशन्ति, यष्टयश्च' इति । अत्र कुन्तादिपदस्य तद्वत्सु पुरुषेषु लक्षणा । कुन्तादेरपि पुरुषसाहित्येन प्रवेशक्रियान्वयादजहल्लक्षणा । तेषां निर्दयप्रहर्तृत्वादिद्योतनं फलम् ।

ग्रामैकदेशदाहादौ सति 'ग्रामो दग्धः, पुष्पितं वनम्' इत्यादिप्रयोगे ग्रामादिपदस्य स्वार्थैकदेशपरित्यागेन तदेकदेशे वृत्तेर्जहदजहल्लक्षणा । दग्धभूयस्त्वादिद्योतनं फलम् ।

सारोपा यथा—

'नाथ त्वदीयमकलङ्कमिमं मुखेन्दु-
मापीय तृप्यति सदा वसुधा यतस्ते ।
तेनैव किं नवसुधारसगोचरोऽभू-
दिन्दुः कलङ्कमलिनीकृतमध्यभागः ॥'

अत्रेन्दुशब्दस्य मुखे लावण्यादिसादृश्याद्गौणसारोपलक्षणा । ताद्रूप्यप्रतीतिः फलम् । एवं 'गौर्वाहीकः, मुखं कमलम्' इत्यादिव्यासेऽपि गौणसारोपलक्षणा द्रष्टव्या ।

गौणसाध्यवसानलक्षणा यथा—

'नाभेरभूत्तव चतुर्भुज नान्तरिक्षं
यन्नाभिरेव यदुनेतरियं ततोऽभूत् ।
अन्योन्यसंश्रयपराहतिदूषितं य-
दाह श्रुतिस्तदविमृश्य किमर्थतत्त्वम् ॥'

अत्रान्तरिक्षपदस्य भगवदवलग्ने सूक्ष्मत्वसादृश्याद्गौणसाध्यवसानलक्षणा। सर्वथैवाभेदप्रतिपत्तिः फलम् । विषयस्य विषयिभेदेनानपह्नुतेन तद्रूपोपरक्तताप्रतीतिस्ताद्रूप्यप्रतिपत्तिः, विषयस्य विषयिणैवाभेदप्रतीतिः सर्वथैवाभेदप्रतिपत्तिः, इति सारोपसाध्यवसायलक्षणाफलयोर्भेदः । विषयविष-

१. 'अत्र भीतिपलायनवाक्ये कुन्ता' ख-ग. २. 'तव' क. ३. 'विषयस्य' ग, ख-ग. ४. 'पह्नवेन' ख-ग.

यिवाचकयोर्द्वयोरपि निर्देशे आरोपः, विषयिपदमात्रस्य विषयलाक्षणिकतया निर्देशोऽध्यवसायः, इत्यारोपाध्यवसाययोर्भेदः।

ननु—सारोपलक्षणोदाहरणे 'मुखेन्दुः' इत्यादाविन्द्वादिपदस्य मुखादौ न मुखत्वादिना लक्षणा, मुखपदस्यापि सत्त्वेन पौनरुक्त्यापत्तेः। नापीन्दुगतलावण्यादिगुणेन। अन्यगुणस्यान्यत्र प्रवृत्तिनिमित्तत्वायोगात्। नापि मुखगतलावण्यादिगुणेन, मुख्यार्थसंबन्धरहितगुणमुखेन लक्षणायोगात्, मैवम्। मुखचन्द्रोभयानुगतलावण्यसामान्यादिमुखेन लक्षणोपगमे दोषद्वयस्याप्यसंस्पर्शात्। इदमेवाभिसंधायोक्तं वृद्धैः—'लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता' इति।

शुद्धसारोपलक्षणा यथा—

'आपादमाचिकुरभारमशेषमङ्ग-
मानन्दसारमरविन्ददृशामसीमम्।
अन्तर्मम स्फुरतु संततमन्तरात्म-
न्नम्भोजलोचन तव श्रितहस्तिशैलम्॥'

अत्र भगवदङ्गेष्वानन्दकारित्वेनानन्दपदस्य सारोपलक्षणा। आनन्दकरणे इतरवैलक्षण्यद्योतनं फलम्। आनन्दकारिणि विषयनिगरणेन 'आनन्दोऽयम्' इति प्रयोगे साध्यवसायलक्षणा। आनन्दव्यभिचारद्योतनं फलम्। एवं शुद्धा पञ्चविधा, गौणी द्विविधा, इति सप्तविधा फललक्षणा।

ननु—गौण्यामपि जहदजहल्लक्षणाभेदौ संभवतः 'मुखं कमलम्, गौर्बाहीकः' इत्यादौ जहल्लक्षणा तावत्स्फुटैव। अजहल्लक्षणापि गोबाहीकोभयविषये 'गाव एते समानीयन्ताम्' इत्यादौ दृश्यते। अतः कथं द्विविधैव गौणी; उच्यते—मुख्यार्थसादृश्येन लक्षणा गौणी। न च तत्रैव तत्सादृश्यमस्ति। येन मुखेऽपि गौणी वृत्तिः स्यात्। शुद्धा त्वजहल्लक्षणा 'कुन्ताः प्रविशन्ति' इत्यादौ विशेषणवाचिनो विशिष्टे संभवति विशिष्टविशेषणयोरेकदेश्येकदेशभावरूपसंबन्धसत्त्वात्। अतो 'गाव एते समानीयन्ताम्' इत्यादावभिधालक्षणाभ्यामेवार्थद्वयप्रतिपादनं 'गङ्गायां जलं घोषश्च तिष्ठति'

इत्यत्रेवेति न गौण्या जहदजहल्लक्षणाभेदसंभवः । तस्मात्षडेव लक्षणाभेदा इति । इत्थमयं चिरंतनैः प्रदर्शितो लक्षणाविभाग इति ।

अत्रेदं प्रतिभाति—शुद्धासु साध्यवसायलक्षणाभेदकथनमयुक्तम्, परार्थे स्वसमर्पणस्याविशेषेण तस्य जहल्लक्षणानतिरेकात् । नहि तदविशेषेऽपि सारोपलक्षणायां विषयवाचकसामानाधिकरण्यकृतवैचित्र्यान्तरमस्ति येन तद्वदेव जहल्लक्षणातः पृथगुदाह्रियेत ।

ननु—'कार्यकारणभावसंबन्धेन वृत्तिः इत्यत एव पृथक्त्वमस्तु, कार्यकारणभावातिरिक्तेन गङ्गातीरादिगतसंयोगादिसंबन्धेन वृत्तौ जहल्लक्षणा' इत्यसंकरोपपत्तेः । मैवम् । 'राजकीयः पुरुषो राजा, इन्द्रार्था स्थूणा इन्द्रः, अतक्षायं तक्षा, अग्रहस्तोऽयं हस्तः' इति स्वस्वामिभावतादर्थ्यतात्कर्म्यावयवावयविभावेष्वपि कार्यकारणभाव इव सारोपाध्यवसायलक्षणयोराकरग्रन्थेषूदाहरणादाश्रयाश्रयिभावसंबन्धेऽप्यलंकारसुधानिधावुदाहरणाच्च वैचित्र्यान्तराभावेऽपि संबन्धभेदमात्रेण विधान्तरोपगमे संबन्धभेदान्तरमवलम्ब्यापि विधान्तरोपवर्णनस्य प्रत्याख्यातुमशक्यतया सप्तविधत्वनियमासामञ्जस्यप्रसङ्गाच्च ।

ननु—साध्यवसायलक्षणोदाहरणेष्वभेदाभिव्यक्तिरस्ति, 'अयमानन्दः, अयं राजा' इत्यादावानन्दराजाद्यभेदाभिव्यक्तिपूर्वकमेवानन्दाव्यभिचारित्वानुल्लङ्घ्यशासनत्वादिफलप्रतीतेः, अतो व्यङ्ग्यवैचित्र्येण भेदोऽस्तु इति चेत्, न । जहल्लक्षणोदाहरणेऽपि तीरे प्रवाहाभेदाभिव्यक्तिपूर्वकमेव तत्र तद्गतातिशायितशैत्यपावनत्वादिफलप्रतीतेः । तीरे प्रवाहतादात्म्यप्रतीत्यभावे तत्र प्रवाहगतातिशयितशैत्यादेः प्रत्ययासंभवात् । नहि तीरे गङ्गासंबन्धप्रयुक्तं तद्गतस्वाभाविकशैत्यादिद्योतनमेव लक्षणाफलम्, येन गङ्गादिसंबन्धितीरत्वेन लक्षणयैव तल्लभ्यते इति नाभेदाभिव्यक्तिरङ्गीक्रियते सत्यपि मुख्ये गङ्गातीरादिपदे स्वायत्ते च शब्दप्रयोगे मुख्यप्रयोगादपि

१. 'इत्यत्रान्वेति' ख-ग. २. 'प्रभेद' ख-ग. ३. 'संबन्धे' क. ४. 'वर्णनस्यापि' ख-ग. ५. 'शैत्यपावनत्वा(दे): प्र' ख; 'शैत्यपावनत्वप्रत्य' ग.

लभ्यस्य लक्षणाफलत्वायोगात् । काव्यसरणौ—'लक्षणायां काव्यशोभातिशयाधायकतयाप्यधिकं स्तोतुकामस्तस्य प्रवाहतादात्म्यप्रतिपत्त्या तद्गतातिशयितपावनत्वद्योतनाय तस्मिन्गङ्गापदं प्रयुङ्क्ते' इति दर्शनाच्च । अतो जहल्लक्षणायामप्यभेदाभिव्यक्तिरविशिष्टा । उक्तं च काव्यप्रकाशिकायाम्—'तटादीनां गङ्गादिशब्दप्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः' इति । रत्नाकरेणाप्युक्तम्—'स्रोतस्तीरयोरेकशब्दबोध्यत्वेन तादात्म्यप्रतीतेः स्रोतोधर्माः शैत्यपावनत्वादयस्तीरे प्रतीयन्त इति प्रयोजनसिद्धिः' इति । अतः साध्यवसायलक्षणायाः फलकृतोऽन्यकृतो वा न जहल्लक्षणातो भेदः संभवति इति न तदुदाहरणपार्थक्यं युक्तम्[1] । तथा सारोपलक्षणोदाहरणे उपमानोपमेयानुगतसाधारणधर्ममुखेन लक्षणा इत्ययुक्तम् । तथासति तत्र साधारणधर्मस्यापि पदान्तरेणोपादानं तत्र पौनरुक्त्यापत्तेः । यथा—

'ताराभिरामपरिणाहलसत्सिताभ्रं
तापिच्छमेचकमुरःशरदन्तरिक्षम् ।
प्राप्यैव देव तव कौस्तुभपूर्णचन्द्रः
पूर्णां बिभर्ति पुरुषोत्तम कान्तिरेखाम् ॥'

अत्र हि वक्षोन्तरिक्षयोः साधारणः परिणाहित्वमेचकत्वादिधर्मोऽपि पृथगुपात्त एव । 'उपात्तधर्मातिरिक्तधर्ममुखेन लक्षणास्तु' इति चेत्, न । उपात्तमेचकत्वादिव्यक्त्यतिरिक्तसामान्यधर्मास्फुरणेऽपि सहृदयानां परिपूर्णवाक्यार्थप्रतीतिदर्शनाद्द्रव्यत्वादिसामान्यधर्मस्य कवितानङ्गत्वात् । अन्ततः कवयितुरप्येतादृशस्थलेषूपात्तधर्मातिरिक्तधर्मगर्भीकाराभावाच्च ।

'ननु—इह मा भूत्सारोपलक्षणा । 'उर एव शरदन्तरिक्षम्' इति मयूरव्यंसकादिसमासोपगमे हि सा भवति । किंतु—'उरः शरदन्तरिक्षमिव' इत्युपमितसमासोऽस्तु । तत्र च विग्रहवाक्यस्थो लुप्त इवकारः सादृश्यं प्रतिपादयतीति नोपमानवाचकस्योपमेये लक्षणा' इत्यालंकारिकाणामभ्युपगमः । तत्र तैर्लुप्तोपमाङ्गीकारसत् । इति न कश्चिद्दोषः इति

1. 'पार्थक्ययुक्तम्' ख-ग.

चेत्, न । मेचकत्वादिसामान्यस्य शब्दोपात्ततयोपमितसमासासंभवात् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सामान्याप्रयोगे एव तत्समासानुशासनात् । आलंकारिकैरपि—'सामान्यप्रयोगे सत्युपमाबाधकसत्त्वात्सारोपलक्षणामूलको रूपकालंकारः । नतूपमालंकारः' इत्यभ्युपगमात् । उपमितसमासे धर्मवाचकलुप्तोपमालंकारस्यैव तैरुदाहरणाच्च । सामान्यधर्मप्रयोगेऽप्युपमितसमासाङ्गीकारे हि केवलवाचकलुप्तापि तत्रोदाह्रियेत ।

नन्वेवं साधारणधर्मप्रयोगे सादृश्यमुखेन लक्षणास्तु तद्वाचकस्य यथेववादेरप्रयोगेण पौनरुक्त्याप्रसङ्गात् । तत्प्रयोगे उपमानवाचकस्य सादृश्यप्रतियोगिभूतस्ववाच्यपरतयोपमेयलक्षणाया अवाच्यत्वात्—इति चेत्, न । तथासति सादृश्यस्य शब्दोपात्तत्वेनोपमालंकारस्य प्राप्त्या 'सारोपलक्षणायां रूपकादिरलंकारः, नोपमा' इत्यलंकारविभागासामञ्जस्यप्रसङ्गात् । न हि सादृश्यस्य वाच्यत्व एवोपमा, 'कमलसुहृन्मुखम्' इत्यादौ सुहृदादिपदेन लक्षणायामप्युपमासंप्रतिपत्तेः । अपि च—'पादाम्बुजम्' इत्यादौ व्याघ्रादेः समासेनोपमायाः, मयूरव्यंसकादिसमासेन रूपकस्य च संभवेन सर्वत्रानवधारणे प्राप्ते यत्र

'पादाम्बुजं भवतु वो विजयाय मञ्जु
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ।

इत्यादौ पादे संभवन्मञ्जीरयोगादिकं निबध्यते, तत्र तदानुगुण्यात्पूर्वपदार्थप्रधानेन व्याघ्रादिसमासेनोपमालंकारः । यत्र तु

'यस्यानिशं दिविषदश्चरणारविन्द-
मुत्तंसयन्त्यमितभक्तिभरावनम्राः ॥'

इत्यादावरविन्दकार्यमुत्तंसनादिकं निबध्यते, तत्र तदानुगुण्यादुत्तरपदार्थप्रधानेन मयूरव्यंसकादिसमासेन रूपकालंकारः, इति व्यवस्था सर्वैरपि प्रतिपाद्यते । न च—इयं व्यवस्था 'चरणारविन्दम्' इत्यादिरूपकस्थलेऽप्यरविन्दादिपदानामरविन्दत्वाद्याकारमपहायारुणिमादिसाधारणधर्ममुखेन तन्नि-

१. 'वाचकसमस्ता' ख-ग. २. 'सामान्यधर्म' क. ३ 'तत्तत्प्रयोगे' ख-ग. ४. 'सादृश्यश' क. ५. 'सादृश्यवाच्यत्व' क.

बन्धनसादृश्यमुखेन वा चरणादिलक्षकत्वे युज्यते । तथा सत्युत्तरप दार्थस्यारुण्यसादृश्यगुणस्य प्राधान्यादियोगेन मयूरव्यंसकादिसमासाश्रय णेऽपि व्याघ्रादिसमासाश्रयण इव पूर्वपदार्थचरणस्यैव प्राधान्यापत्त्योत्तंसना नुगुण्यस्य विरहतौल्यापत्तेः । गुणजात्योर्जातिप्राधान्यस्य नीलोत्पलादौ व्य वस्थितेः । उत्तरपदार्थस्य प्राधान्येऽप्यरविन्दजातेरिवारुण्यसादृश्यादिगुण स्योत्तंसनानुगुणत्वाभावाच्च । तस्मात्—'सारोपलक्षणोदाहरणेषु साधारण धर्मादिमुखेन लक्षणा—' इत्ययुक्तम् । तथा—'ताद्रूप्यप्रतीतिरत्र फलम्—' इत्यप्ययुक्तम् । सामान्यधर्ममुखेन सादृश्यमुखेन वा लक्षणोपगमे ताद्रूप्या भिव्यक्त्ययोगात् । तथा हि 'कान्तिमन्मुखम्,' 'चन्द्रसदृशं मुखम्' इत्या दिरर्थः संपद्यते । न चैतावता ताद्रूप्याभिव्यक्तिः, 'कान्तिमन्मुखम्' इत्या दिप्रयोगेऽपि तत्प्रसङ्गात् । न च—'गङ्गायां घोषः' इत्यादौ स्रोतस्तीरयो रभेदाध्यवसायवन्मुखचन्द्रयोरेकशब्दबोध्यतया केवलशब्दशक्तिमूलव्यञ्ज नव्यापारेण ताद्रूप्याध्यवसाय इति नातिप्रसङ्गः—इति वाच्यम्, तदा मुखकान्तिमतोरेव ताद्रूप्याभिव्यक्तेः संभवेन 'वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते' इत्यादावानुभाविकस्य मुखत्वोपरक्तचन्द्रताद्रूप्यप्रत्यय- स्याक्लिष्टसमर्थनासंभवात् । तथा—'मुखं कमलम्' इत्यादिव्यासेऽपि सर्वत्र विषयविषयिपदयोः सामानाधिकरण्ये सारोपलक्षणा इत्यप्ययुक्तम् ।

'विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥'

इत्यत्र हंसादिशब्दानां वर्ण्ये राजनि प्रत्यासत्तिरूपमुख्यसादृश्याप्रतीत्या लक्षणासंभवात् । तथा हि—विदुषां मानसं हृदयमेव मानसं सर इत्यादि श्लेषभित्तिकाभेदाध्यवसायलभ्यमानसवासित्वादिसाधारणधर्मनिबन्धनमेव तत्र सादृश्यं वाच्यम् । तदन्यमुखकमलादिवत्प्रसिद्धसादृश्यस्याभावात् । न च—

१. 'सादृश्यादिगुणस्य' ख-ग. २. 'प्राधान्यायोगेन' ख-ग. ३. 'नुगुणस्य' क. ४. 'सादृश्यप्रतीत्या' ख-ग.

तेन सादृश्येन लक्षणा संभवति, तदुम्भकस्य श्लेषस्य रूपकोत्थाप्यतया रूपकापेक्षलक्षणादशायां तस्य बुद्धिपथानारोहात् । न च—श्लेषस्यैव प्राथम्यं किं न स्यात्—इति वाच्यम्, रूपकं विना कवेरर्थद्वयविवक्षायामिह गमकाभावेन श्लेषानिवृत्तेः । अभिधायाः प्रकरणनियम्यत्वपक्षे प्राचीनाभिमते रूपकात्प्राक्प्रकरणसंबन्धरहितसारोपलक्षणार्थान्तराभिधानस्यैवासंभवात् ।

'रूपकं पूर्वसंसिद्धं श्लेषं तज्ज्ञापयेद्यदि ।
तदा रूपकमेव स्यादन्यथा श्लेष इष्यते ॥'

इति श्लेषरूपकयोर्विभागं व्यवस्थापितवता चक्रवर्तिनाप्यस्मिन्नुदाहरणे रूपकोपवर्णनेनात्र श्लेषपाश्चात्यत्वस्यास्फुटीकरणाच्चेति । अत्रेदं तत्त्वम्—'विद्वन्मानसहंस—' इत्यादौ हंसादिपदानां वर्ण्ये राजनि लक्षणा नाङ्गीकर्तव्या सामानाधिकरण्येन वर्ण्यस्य राज्ञः प्रसिद्धहंसजातीयादिभिरभेदस्य वाक्यार्थविधयैव प्रतीत्युपपत्तेः। न च—एवमभेदप्रत्ययसंभवेऽपि ताद्रूप्यप्रत्ययो न लक्षणां विना सिध्येत्। स एव च विषयविषयिपदसामानाधिकरण्यस्थले सर्वत्र विवक्षितः इति वाच्यम्, तत्र मानाभावात् । 'ऊर्ध्वं विरञ्चिभवनात्तव नाभिपद्मात्' इत्यादौ विषयविषयिपदसामानाधिकरण्येऽप्येवकारसाक्षात्पदाभ्यामुरःस्थले प्रसिद्धपद्मपदाभेदविवक्षाया एव स्फुटीकरणाच्च। न च—एवं 'विद्वन्मानसहंस' इत्यादावतिशयोक्तिरेव स्यात् 'विषयस्य विषयिताद्रूप्ये रूपकम्, विषय्यभेदेऽतिशयोक्तिः' इति व्यवस्थितेः । तथा च—'विषयविषयिसामानाधिकरण्यस्थले रूपकम्, विषय्यभेदमात्रनिर्देशस्थलेऽतिशयोक्तिः' इति व्यवस्थाविभागः इति वाच्यम् ।

'हृत्पङ्कजानि भजतां प्रतिबोधयन्ती
संसारसागरमपि प्रविशोषयन्ती ।
ज्योत्स्ना त्वदङ्घ्रिनखचन्द्रसमुद्गतेयमन्यादृशीमभयदां प्रकृतिं बिभर्ति ॥'

१. 'विरोधयैव' क.

इत्यत्र नखकान्तिरूपविषयनिगरणेन 'ज्योत्स्ना' इति विषयिपदमात्रनिर्देशेऽपि पङ्कजविकासकत्वादिना प्रसिद्धज्योत्स्नातो व्यतिरेकेण तत्ताद्रूप्यमात्रप्रतीतेर्दर्शनेन व्यवस्थाद्वयस्याप्यशक्याङ्गीकारत्वात् । तथा च यदि 'ताद्रूप्ये रूपकम्, अभेदेऽतिशयोक्तिः' इति व्यवस्थां परित्यज्य 'विषयविषयिपदसामानाधिकरण्ये रूपकम्, विषयिपदमात्रनिर्देशेऽतिशयोक्तिः' इति व्यवस्थाद्रियते, तदा 'विद्वन्मानसहंस' इत्यादावभेदप्रतीतौ सत्यामपि रूपकं संभवतीति न काचिदनुपपत्तिः । यदि च तथा सति रूपकातिशयोक्त्योः शब्दवैचित्र्यमात्रभेदप्राप्त्या परस्परमर्थालंकाररूपत्वं न स्यादित्याद्या व्यवस्थाद्रियते, तदा 'ज्योत्स्ना त्वदङ्घ्रिनख–' इत्यादौ विषयिपदमात्रनिर्देशेऽपि प्राचीनमर्यादायामतिशयोक्तिमपहाय रूपकमेवाङ्गीकर्तव्यम् । तद्वत् 'विद्वन्मानसहंस–' इत्यादौ विषयविषयिपदसामानाधिकरण्येऽप्यतिशयोक्तिरङ्गीक्रियताम् । किमनुपपन्नम् । तस्मात्—एतादृशस्थले समभिव्याहारादभेदप्रतीत्युपगमे न कश्चिद्दोषः इति व्यर्थो लक्षणोपपादनप्रयासः । न च एवं सर्वत्र विषयविषयिसामानाधिकरण्यस्थले समभिव्याहारादभेदप्रतीतेर्वक्तुं शक्यत्वात्क्वचिदपि सारोपलक्षणा न स्यात्—इति वाच्यम्, इष्टापत्तेः ॥

इति श्रीअप्पदीक्षितविरचिते वृत्तिवार्तिके[1] लक्षणावृत्तिनिर्णयो नाम द्वितीयः परिच्छेदः ।

समाप्तश्चायं समुपलभ्यमानो ग्रन्थः ।

---

१. 'इति वृत्तिवार्तिके' ख-ग.

वैयाकरणसिद्धान्तमञ्जूषास्थो व्यञ्जनानिर्णयः ।

(अस्मिन्वृत्तिवार्तिकग्रन्थे व्यञ्जनावृत्तिनिर्णयस्य प्रारम्भप्रतिज्ञातस्यापि सकलादर्शादर्शनात्तन्निरूपणस्याप्यावश्यकत्वाच्च नैयायिकप्रबन्धेषु तदनादरेण वैयाकरणग्रन्थेषु तदादरेण नागेशभट्टविरचितवैयाकरणसिद्धान्तमञ्जूषास्थ एव व्यञ्जनानिर्णयो लिख्यते –)

मुख्यार्थसंबद्धासंबद्धसाधारणमुख्यार्थबाधग्रहाद्यप्रयोज्यप्रसिद्धाप्रसिद्धार्थविषयकधीजनकत्वं व्यञ्जना । सा चेयं शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र, तथैवानुभवात् । 'अनया कटाक्षेणाभिलाषो व्यञ्जितः' इति सर्वजनप्रसिद्धेस्तस्यां चेष्टावृत्तित्वस्याप्यावश्यकत्वाच्च । एतेन—'अर्थादीनां न व्यञ्जकत्वम् । किंतु पदस्यैव' इत्यपास्तम् ।

'रतिकाले विलोक्य श्रीर्नाभिपद्मे पितामहम् ।
रमाकुलाच्छादयते दक्षिणं नयनं हरेः ॥'

इत्यादौ हरिपदेन 'दक्षिणनयनस्य सूर्यात्मकत्वम्, तन्निमीलनेन सूर्यास्तः, तेन पद्मसंकोचः, तेन पितामहस्थगनम्, तेनाप्रतिबद्धं रतिविलसितम्' इति क्रमेण व्यङ्ग्येषु प्रतीयमानेषु तत्तदर्थप्रतीत्युत्तरमेव व्यङ्ग्यप्रतीतेरर्थस्यापि व्यञ्जकत्वावश्यकत्वात् ।

'पश्यात्र नलिनीपत्रे बलाका दृश्यतेऽचला ।
रम्ये मारकते पात्रे शुक्तिकेव च निर्मला ॥'

इत्यत्रापि निश्चलत्वेन शुक्त्युपमया चाश्वस्तत्वम्, तेन निर्जनत्वम्, तेन 'तदेवावयोः संकेतस्थानम्' इत्यादिषु क्रमेण प्रतीयमानेषु तत्तदर्थव्यङ्ग्येष्वपि बोध्यम् । पदस्य च तत्तत्स्वार्थबोधने उपरतत्वात्पुनःपुनरनुसंधानकल्पने गौरवम्, तदननुभवाच्च । अनया चार्थबोधे जननीये वक्तृबोद्धव्यवाच्यादिवैशिष्ट्यज्ञानं प्रतिभा च सहकारि तद्बीजनकज्ञानजनकमेव वा । अतो नातिप्रसङ्गः । प्रतिभा च नवनवोन्मेषशालिनी बुद्धिः । तदुक्तम्—

'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ।'

इति । नवनवोन्मेषो जन्मान्तरीयतद्बीजनकत्वज्ञानजन्यसंस्कारोद्बोधः ।

'वक्त्रादिवैशिष्ट्यसहकारेण तज्जनिका बुद्धिः प्रतिभा' इति फलितम् । एवं च शक्तिरेतज्जन्मगृहीतवार्थबोधिका, व्यञ्जना तु जन्मान्तरगृहीतापि, इत्यपि शक्तेरस्या भेदकम् । इदमेवाभिप्रेत्य 'व्यञ्जना स्वरूपसती हेतुः' इति प्रवादः । यद्यपि प्रागुक्तरीत्या लक्षणातोऽपि भेदः सिद्धः, तथापि प्रकारान्तरेणापि भेदं वक्तुं 'मुख्यार्थ–'इत्याद्युक्तम् । 'पश्यात्र नलिनीपत्रे–' इत्यादौ वक्तृतात्पर्यविषयीभूतवाच्यार्थबाधाभावेऽपि तज्ज्ञानाभावेऽपि प्राग्दर्शितव्यङ्ग्यप्रतीतेः, मुख्यार्थबाधज्ञानसत्त्वे तदप्रतीतेश्च न व्या(वैय)-ञ्जनिकबोधे तस्य सहकारित्वम् । एवं 'गतोऽस्तमर्कः' इत्यादेः शिष्येण संध्यावन्दनादेः कर्तव्यत्वाभिप्रायेण गुरुं प्रति प्रयुक्ताद्वक्तृतात्पर्याभावेऽपि प्रतिवेश्यादीनामभिसरणीयक्रमादिबोधस्य वाच्यार्थप्रतीतिपूर्वकस्य वाच्यार्थबाधज्ञानेऽजायमानस्य लक्षणयोपपादयितुमशक्यत्वाच्च । यत्तु—'गतोऽस्तमर्कः' इत्यादौ न व्यञ्जना, एकसंबन्धिदर्शनादपरसंबन्धिस्मरणवदुपपत्तेः, इति, तन्न । असंबद्धव्यङ्ग्यप्रतीतावस्यासंभवात् । किं च 'गतोऽस्तमर्कः' इत्यादिश्रवणोत्तरं 'संध्यावन्दनकर्तव्यत्वं मया स्मृतम्' इत्यनुव्यवसायाभावात्, तत्तानुल्लेखाच्च । 'इदं पदमेतदर्थस्य न वाचकम्, नापि लक्षकम्, नापि स्मारकम् । अपि तु व्यञ्जनया बोधकम्' इति प्रामाणिकव्यवहारेणाप्यतिरिक्ततत्सिद्धेश्च । एतेन—तत्तदर्थानां वक्त्रादिवैशिष्ट्यप्रतिभादिसहकृतमनसैव विशिष्टधीसंभवात् । चमत्कारं प्रति शाब्दस्येव मानसस्यापि चेष्टानुरोधेन हेतुतायाः क्लृप्तत्वाच्च व्यञ्जनासत्त्वे न मानम् । प्रतिभा च तत्तत्पदपदार्थविषयकसंस्कारोद्बोधको बुद्धिविशेषः । तत्र च तत्तदर्थज्ञानं वक्त्रादिवैशिष्ट्यं ज्ञानं च सहकारि—इति परास्तम् ॥

'व्यङ्ग्योऽर्थोऽनुमेयः' इति त्वयुक्तमेव, विरुद्धानैकान्तिकेभ्यो व्याप्तिपक्षधर्मतादिनिर्णयाभावेऽपि व्यङ्ग्यार्थप्रतीतेः । किं च—सिद्धिसत्त्वेऽपि व्यङ्ग्यार्थबोधदर्शनेन तत्प्रतिबध्यतावच्छेदककोटौ तत्तद्भेदनिवेशेऽतिगौरवापत्त्याव्या(वैय)ञ्जनिकबोधस्यातिरिक्तत्व एव लाघवम् । अन्यथा शब्दप्रामाण्यस्याप्युच्छेदापत्तिरित्यन्यत्र विस्तरः । बोधकत्वस्य चेष्टायां सत्त्वेऽपि तन्नि-

ष्ठबोधकत्वं न शक्तिः, 'चेष्टा शक्ता' इति प्रामाणिकव्यवहाराभावात् । किं तु तज्जन्यबोधे तज्ज्ञानस्य कारणत्वं बोध्यम् । तत्तद्वाचकशब्दस्मरण-द्वारा चेष्टया बोधः—इत्यपि कश्चित् । तन्न । 'चेष्टयैडमूकादिव्यवहारानापत्तेः । तस्यापि जन्मान्तरीयशब्दस्मरणम्' इत्यन्ये ॥

अत एव निपातानां द्योतकत्वमाकर उक्तम् । स्फोटस्य च व्यङ्ग्यता हर्यादिभिरुक्तैव । द्योतकत्वं च समभिव्याहृतपदशक्तिव्यञ्जकत्वमेव—इति वैयाकरणानामप्येतत्स्वीकार आवश्यकः ॥

इति श्रीनागेशभट्टविरचितायां वैयाकरणसिद्धान्तमञ्जूषायां व्यञ्जनानिरूपणम् ।

श्रीः

तत्त्वबिन्दुः

सर्वतन्त्रस्वतन्त्रश्रीवाचस्पतिमिश्रकृतः

शाब्दबोधकारणावधारणपरः

काशिकराजकीयसंस्कृतप्रधानपाठशालायाम्
साहित्यशास्त्राध्यापकेन महामहोपाध्याय-
श्रीगङ्गाधरशास्त्रिणा

विषमस्थलटिप्पणीनिवेशनपुरःसरं संशोधितः

काश्याम्
ई० जे० लाजरसकंपन्याख्येन मेडिकलहालनाम्नि
मुद्रालये मुद्रयित्वा प्रकाशितः ।

सं. १९५६ वै. ब. ७ भौमे

॥ श्रीः ॥

तत्त्वबिन्दोर्भूमिका।

अथैष प्रकाश्यते तत्त्वबिन्दुर्नाम प्रबन्धः शास्त्ररसिकानां प्रमोदमाधातुम् । अस्य निर्माता किल सर्वतन्त्रस्वतन्त्रप्रतिभः श्रीवाचस्पतिमिश्रो यः प्राग्भवे शाङ्करब्रह्मसूत्रव्याख्यानप्रवृत्तोऽन्तरायतिरस्कृते तत्र महत्यनितरसंपादनीये निजावतारकार्ये भगवता श्रीशङ्कराचार्यपूज्यपादेन वाचस्पतिनाम्ना ऽवतीर्य संपादयितास्य-भीप्सितमाकल्पं च सा टीका भुवमलंकुर्यादिति वरेणान्वगृह्यतेति वर्णयन्ति स्म शङ्करदिग्विजये माधवाचार्याः ।

अविसंवादितया नु भगवदादेशस्य षट्त्रिंशदुत्तरैकोनविंशतिशततमे १९३६ वैक्रमाब्दे काशिकराजकीयसंस्कृतपाठशालामलंकरिष्णुभिर्निखिलदर्शननदीष्णैर्मदीयगुरुवरश्रीदबालशास्त्रिचरणैर्मुद्रयित्वा प्रचारिता भामतीनाम्नी शाङ्करब्रह्मसूत्रभाष्यटीका । अस्यामेव शेषे यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिन्दुभिरिति पद्यं ग्रथितवता ऽन्तरा च तत्रावधारितेषु सिद्धान्तेषु विस्तरेण व्यवस्थापनमेतेष्वेव निबन्धेषु प्रतिज्ञातवता ग्रन्थकारेण चिरादेतदालोचनोत्कलिकाऽऽकुला अभाविषत परीक्षणविचक्षणाः । तेष्वयमेकस्यैव विषयस्य व्यवस्थापको निबन्धः ।

> स्फोटे ऽथ वाक्यचरमाक्षरसर्ववर्ण-
> वल्याः पदेषु च निरस्य पथा नवेन ।
> संस्मारितेष्विह हि वस्तुषु सुप्तिङन्तैः
> शाब्दप्रमाजनकता निरधारि मिश्रैः ॥

एतत्सिद्धान्तव्यवस्थापनं च ग्रन्थे निगूढाभिसंधिना तटस्थेनेव वस्तुस्वभावप्रतिपादनमुखेन वेदान्तपरमसिद्धान्तमुपपक्ष

कर्तुकामेन ग्रन्थकर्त्रा कृतम् । तथा हि । तत्त्वमसि अहं ब्रह्मास्मीति महावाक्यार्थधियोर्गुरूपदेशशिष्यानुभवरूपयोश्चिरभुपदिष्टप्रकारेणावर्त्यमानयोरविद्यावरणनिरसनद्वारेण साक्षात्कारहेतुत्वमिति ह्यद्वैतवादिनां मुख्यतमः सिद्धान्तः । तस्य च चरमज्ञानस्य प्रत्यक्षत्वं शाब्दत्वं च दशमस्त्वमसीत्यादाविवेति न तिरोहितं चय्यन्तचिन्तकानाम् । अत एव यत्साक्षादपरोक्षाद् ब्रह्म तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतिभ्यां ब्रह्मणः साक्षात्काररूपत्वमुपनिषन्मात्रगम्यत्वं च निरणायि । वस्तुतन्त्रत्वे एव च ज्ञानस्य प्रमात्वमिति समन्वयसूत्रे भाष्यकारः । योषा वाव गौतमाग्निः सिंहो माणवक इत्यादिवैदिकलौकिकवाक्यैः समानविभक्तिकपदद्वयसमभिव्याहारबलेन जायमानाऽपि तदर्थयोरभेदान्वयधीः कर्तुमकर्तुमन्यथा वा कर्तुं शक्यत्वेन वस्तुतोऽभेदाभावेन पुरुषतन्त्रतया क्रियारूपैव न तु ज्ञानम् । शुक्ले पटे तदभेदधीस्तु वस्तुमात्रनिबन्धना न व्यत्यासं सहत इति क्रियालक्षणविरहाज् ज्ञानम् । तथैव प्रकृते वस्तुमात्रप्रभवत्वे सत्येव जीवब्रह्माभेदधियो ज्ञानत्वमारोपात्मकत्वे तु क्रियैवेति । तथा च साक्षात्कारत्वेनेष्टायाश्चरमवृत्तेर्वस्तुनिबन्धनत्वमवश्यमाश्रयणीयम् । अङ्गीकृतं च परैरपि प्रत्यक्षं प्रति विषयस्य कारणत्वम् । तेन प्रमामात्रं प्रति विषयस्य कयाचिदपि प्रणाड्योपस्थितस्य कारणत्वस्वीकारे बाधकाभावः । न चैवमतीतानागतयोः प्रमाऽव्यवहितप्राक्कालिकस्थितिविधुरतया तद्विषयकानुमितिशाब्दधियोरप्रमात्वमापादनीयम् । प्रमां प्रति बौद्धपदार्थानामेव कारणत्वाङ्गीकारेण सत्कार्यवादाङ्गीकारेण वा वस्तुनः प्रमाप्राक्कालिकतायाः सूपपादत्वात् । प्रकृतसाक्षात्कारशाब्दकारणताया अपि बुद्धिपरिकल्पिते सविशेषणत्वाभ्युपगमेन तस्यालीकत्वप्रसक्तेरिष्टापत्तिग्रस्तत्वात् । अत एव निर्विशेषमुपक्रम्य श्रुतिः । न तस्य कार्यं करणं च विद्यते इति । लौकिकप्रमात्वं तु व्यवहारदशायामबाध्यविषयत्वरूपमुभयत्रा-

पि तुल्यमित्यलमप्रस्तुतविचारप्रयासेन । एवं स्थिते उपनिषदेकगम्यत्वात् निर्विशेषस्य प्रकृतमहावाक्यघटकपदवृत्त्योपस्थितिरावश्यकी सा च समभिव्याहृतपदान्तरार्थेन सहान्वयानुपपत्तिप्रतिसंधानसापेक्षेति भवति जघन्यवृत्त्याश्रयणसाहाय्यसमर्पणमुखेन वाक्यस्य निर्विशेषप्रतिपादकत्वं परमधियो विशेषपरित्यागेन प्रागनधिगतविषयकतया प्रमात्वं चेति चतुरस्रम् । निर्विशेषत्वादेव च परमपुरुषार्थस्य पदार्थान्तरेणान्वयानवकाशः । तत्प्रतिपादकत्वं च श्रुतिशिरसां संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् । उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थतेत्यभिदधत्याचार्याः । सम्यक्त्वं चाचार्यदिशा प्रागनधिगतनिर्विशेषप्रमात्वरूपम् । यदि पुनरन्वितएव पदानां शक्तिः स्यान्न स्यात्तदा प्रकृते कयापि विधया वेदान्तानां निर्विशेषावगमसाधनत्वं प्रमाणान्तरगम्यत्वं तु निर्विशेषस्य सुदूरपराहतमिति महदनिष्टमापद्येत । अतः प्राधान्येनात्र वृत्तिकारमतानुयायी प्रतिपक्ष एव शिक्षणीयो यः क्रियाशेषत्वं ब्रह्मणो विब्रुवन्नाकुलीकरोति चेतांसि ब्रह्मनिष्ठानाम् । जैमिनिसूत्रे भाष्यकारो वार्त्तिककारश्च नात्र प्रतिकूल इति तयोरेवात्र प्रबन्धे प्राधान्येन प्रमाणभावावलम्बनम् । अत एवौत्पत्तिकसूत्रे जै· सू· अ १ पा· १ सू· ५ भाष्यकारो वेदान्तवाक्यानि आत्मज्योतिः सम्राडिति होवाच स एष नेति नेत्यात्मेति होवाचेति निर्विशेषप्रतिपादकान्येवात्मस्वरूपनिरूपणावसर उदाजहार । वार्त्तिककारश्च इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या । दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेनेत्युपसंजहार । स्फोटवादिनश्चरमवर्णो वाक्यघटकसकलवर्णसमुदाये च शाब्दधीहेतुत्ववादिनश्च निराकरणं तु ब्रह्मसूत्रे अ· १ पा· ३ सू· २८ देवादीनां शब्दप्रभवत्वप्रतिपादनावसरे पूर्वपक्षे स्फोटं निवेशितवता वर्णा एव तु पदमिति भगवानुपवर्ष इति वर्णानां शाब्दहेतुत्वमन्यमतत्वेन वदता ऽयापि नाम प्रत्यु-

द्वारत्वमन्ये ऽन्ये च वर्णा: स्युस्तथापि या वर्णेष्वर्थप्रतिपादनप्रक्रिया सा सामान्येषु संचारयितव्येत्यनास्थामाविष्कुर्वता भाष्यकारेण सूचितामरुचिं व्युत्पादयितुमिति तत्रैव भामत्यां दिङ्मात्रमिह दर्शितं विस्तरस्तु तत्त्वबिन्दावबगन्तव्य इत्यभिधानैदंपर्यपर्यालोचनया पर्यवस्यतीति विचारकुशला विदांकुर्वन्तु ।

तदेवमतिनिगूढाशयस्य प्रौढे: परां काष्ठामारूढस्यास्य प्रबन्धरत्नस्य मुद्रणे काशीराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षैर्नानाविधदर्शननिष्णातधिषणै: श्रीमदार्थरवेनिससाहिबमहोदयैरादिष्टो ऽहं पाठशालापुस्तकालयस्थं देवाक्षरलिखितं पुस्तकद्वयं वङ्गाक्षरलिखितं च शुद्धतममेकं पुस्तकमिति त्रीणि पुस्तकानि समालम्ब्य प्रवृत्त: पर्यालोच्य बहुत्र क्लिष्टतां विषमस्थलानि संक्षिप्तया टिप्पण्या विशदयन् निवेशयंश्चाध: पाठभेदान् समापयं प्रस्तुतं कार्यम् । भृशमन्वगृह्ये च निखिलं सटिप्पणीकममुं मुद्रितादापत्रं निर्ध्याय महान्तं श्रममङ्गीकृतवद्भि: पाठशालायां प्रधानपण्डितै: श्रीकैलासचन्द्रशिरोमणिभट्टाचार्यमहाशयै: । अथापीदृशे दुर्घटे कार्ये मादृशाल्पज्ञजनसुलभेन मतिदोषेण जनितानि स्खलितानि सुविमृश्य प्रबोधयन्तु विचक्षणवरा येन कृतज्ञताप्रकाशनपुर:सरं यतेय द्वितीयसंस्करणे निर्दोषतासंपादनाय । सन्तारश्च गुणैकपक्षपातिनो दूषणवाचंयमा: सुधिय: सीसकाक्षरयोजकदोषेण मदीयदृष्टिदोषेण चोपनता अशुद्धीरिति निश्चिन्वन् विरमामि निरर्थकाद्विस्तरादिति । शुभम् ।

फा॰ व॰ २ रवौ
सं॰ १९४८
१४ । २ । ९२

महामहोपाध्यायो मानवल्ल्युपाख्यो
गङ्गाधरशास्त्री ।

तत्त्वबिन्दुः ।

अहये बुध्न्याय नमो ब्रध्नाय नमो नमोऽस्तु गणपतये ।
आर्यायै भारत्यै नमो नमश्चास्तु विष्टरश्रवसे * ॥ १ ॥

इह खलु पदकदम्बश्रवणसमनन्तरमविवादं विदितपदतदर्थसङ्गतीनामनधिगतार्थगोचरा धीरुदयमासादयति पुंसाम् । तस्या निमित्तं प्रति विप्रवदन्ते वादिनः ।

केचिदाहुरनवयवमेव वाक्यमनाद्यविद्योपदर्शितालीकवर्णपदविभागमस्या निमित्तमिति † ।

पारमार्थिकपूर्वपूर्ववर्णपदपदार्थानुभवजनितसंस्कारसहितान्त्यवर्णविज्ञानमित्येके ‡ ।

---

* अहये बुध्न्याय शिवाय । अष्टमूर्तिरहिर्बुध्न्य इति कोशः । सामान्तरायानुपादायैतस्यैवोपादानं तु अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः । ऋचः सामानि यजूंषि । सा हि श्रीरमृता सताम् । तैत्तिरीयब्राह्मणे अ० १ प्र० २ अ० २६ मन्त्र ३ इति मन्त्रानुसंधापनेन शिवस्य वेदत्रयगोप्तृत्वद्योतनायास्य मन्त्रस्य शाबरभाष्ये अ० २ पा० १ सू० ३५ उदाहृतत्वेन ऋक्त्वादिज्ञानोपयुक्तक वाक्यत्वलक्षणे सू० ४६ बहुत्वात्पदार्थानामिति शाबरभाष्योक्तेरन्विते पदानां न शक्तिरिति व्यवस्थापयिष्यमाणसिद्धान्तस्य भाष्यकाराभिमतत्वस्फोरणाय चेति बोध्यम् । तथैवोपसंहरिष्यति । ब्रध्नः सूर्यः भास्कराहस्करब्रध्नेति कोशः । आर्यायै भारत्यै सरस्वत्यभिन्नायै गौर्यै । यन्मूलमेव सरस्वतीनमनस्यायित्यात्यन्स्थायतनं गौर्याः एव शास्त्रोपदेशात्तथोक्तिः । सरस्वतीगौर्योरभेदश्च देवीमाहात्म्योत्तमचरिते स्पष्टः । आर्या दाक्षायणी चैवेति कोशः । विष्टरश्रवसे विष्णवे । वैकुण्ठो विष्टरश्रवा इति कोशः । अनेनादित्यमम्बिकां विष्णुं गणनाथं महेश्वरमिति स्मार्तैरवश्योपास्यदेवतापञ्चकनमस्काररूपं मङ्गलमनुष्ठितं भवति ।

† वैयाकरणाः । तथा च वाक्यपदीये काण्ड १ श्लो० ७३ पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च । वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चनेति । काण्ड २ श्लो० २३४ शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते इति । उपपादयिष्यते चेदमग्रे । एवं मतान्तराण्यपि ।

‡ नैयायिकाः । वात्स्यायनभाष्ये अ० ३ आ० २ सू० ६२ वाक्यस्थेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावत् श्रवणं भवति श्रुतं वर्णमेकमनेकं वा पदभावेन स प्रतिसंधत्ते प्रतिसंधाय पदं व्यवस्यति पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते पदसमूहप्रतिसं-

प्रत्येकवर्णपदपदार्थानुभवभावितभावनानिचयजन्म*लब्धजन्मस्मृतिदर्पणारूढा वर्णमालेत्यन्ये† ।

पदान्येवाकाङ्क्षितयोग्यसंनिहितार्थान्तरान्वितस्वार्थाभिधायीनीत्यपरे‡ ।

पदैरेव समभिव्याहारवद्भिरभिहिताः स्वार्था आकाङ्क्षायोग्यतासंनिधिसध्रीचीना वाक्यार्थधीहेतव इत्याचार्याः§ । तत्र ।

प्रीयमानपरित्यागो बाधके नासति स्फुटे ।
दृष्टात्कार्योपपत्तौ च नादृष्टपरिकल्पना ॥

स खल्वयमेको वाक्यात्मा वाक्यार्थधीहेतुरनुभवाद्वा व्यवस्थाप्यते अर्थधीभेदाद्वा ऽन्यथा ऽनुपपद्यमानात् ।

अनुभवो ऽपि च वाक्यात्मानमेकमवयविनमनेकपदवर्णव्यासङ्गिनमङ्गप्रत्यङ्गवर्तिनमिव देवदत्तमनुभवेत् प्रत्यस्तमितवर्णपदविभागं वा ।

वर्णाः पदानि चास्यावयवाः सत्तामात्रेणानुभूयमानतया वा भवेयुः ।

न तावत्पूर्वकल्पः । अवयविन्यूनपरिमाणत्वादवयवानां परममहतां च वर्णानां तदनुपपत्तेः । गगनगुणत्वे वा ऽद्रव्यतया समवायिकारणत्वाभावेनावयवभावानवकल्पनात् ।

वायवीयावयवारब्धवर्णवादिना||मप्याशुतरविनाशशीलतया वर्णा-

धानाच्च वाक्यं व्यवस्यति संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यत इति । सिद्धान्तमुक्तावल्यां शब्दखण्डे च प्रत्येकपदानुभवजन्यसंस्कारैश्चरमतावद्विषयकस्मरणस्याव्यवधानेनोत्पत्तेः-तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात् इति । एवं पदवाक्यरत्नाकरादिष्वपि ।

* जन्मेति पदमधिकमपि पुस्तकत्रये सत्वात्स्थापितम् ।

† उपवर्षप्रभृतयो मीमांसकाः । ब्रह्मसूत्रशाङ्करभाष्ये अ० १ पा० ३ सू० २८ वर्णा एव तु शब्द इति भगवानुपवर्षः इति । शाबरभाष्येऽपि अ० १ पा० १ सू० ५ अथ गौरित्यत्र कः शब्दः गकारौकारविसर्जनीया इति भगवानुपवर्ष इति । योगभाष्ये व्यासदेवोऽपि पा० ३ सू० १७ गकारौकारविसर्जनीयाः सास्नादिमन्तमर्थं द्योतयन्तीति ।

‡ अन्विताभिधानवादिनः प्राभाकराः ।

§ भाट्टाः शबरस्वामिप्रभृतयश्च । तन्त्रवार्तिके अ० २ पा० १ सू० ४६ पदार्थैः पदविज्ञातैर्वाक्यार्थः प्रतिपाद्यते इति । शाबरभाष्ये अ० १ पा० १ सू० २५ पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि अथेदानीं पदार्था अवगताः सन्तो वाक्यार्थं गमयन्तीति ।

|| वाक्यपदीये काण्डे १ श्लो० १०९ लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।

नां परस्परमसहभुवामसंबद्धानामवयव्यारम्भासम्भवात् । ते खल्वेते क्रम-
भाविनो ऽवयविनं वा तदसमवायिकारणं वा व्यतिषङ्गं* बिभ्रति ।
अबिभ्राणाश्च कथमवयवा व्यतिषक्ता वा । एकद्रव्यस्य च कार्यद्रव्यस्या-
नुपपत्तेर्द्रव्यविनाशकारणद्वयाभावेन कृतकनित्यत्वप्रसङ्गात् † । असहभा-
वित्वादेवानुभूयमानतया ऽप्यवयवभावः परास्तो वेदितव्यः । आशुतर-
विनाशित्वेनानुभवानां तत्कर्मतया ऽपि तथात्वेन‡ सहभावाभावात् ।

स्यादेतदनवयवमेव वाक्यं वाक्यार्थस्य च वाचकम् । न च वर्णा
एवानुभूयन्ते न तु तदतिरिच्यमानशरीरमपि वस्त्विति वाच्यम् । पद-
मिति वाक्यमिति चानुसंहारबुद्धावभिन्नस्य वस्तुन उपारोहात् । न
खल्वियं बुद्धिरभिन्नवस्तुनिर्भासा परस्परव्यतिरिच्यमानात्मनो वर्णानेव
गोचरयितुमर्हति । एकत्वनानात्वयोरेकत्रासमवायात् । न च वर्णात्मन-
स्तत्समवायिनो वाक्यस्य कुतस्तदुपरागवती प्रख्येति वाच्यम् । तदतिरि-
च्यमानमूर्तीनां परमार्थसतां वर्णानामभावात् । तदेव|| हि सर्वजनीन-
मानसप्रत्यक्षप्रवेदनीयप्रयत्नभेदभिन्ननानाध्वनिप्रत्येकव्यञ्जनीयं तत्त्वं¶
ध्वनयस्तु तुल्यस्थानकरणलब्धजन्मतया परस्परविसदृशतत्तत्पदवाक्यव्य-

---

स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते । तस्य कारणसामर्थ्याद्वेगप्रचयधर्मिणः ।
संनिपाताद्विभज्यन्ते सारवत्यो ऽपि मूर्तय इति ।

* व्यतिषङ्गो ऽसमवायिकारणीभूतः संयोगः ।

† अवयवद्वयानारब्धस्य परमाणुगगनादेर्द्रव्यस्य कार्यताया अनङ्गीकारात् । द्रव्य-
नाशस्यासमवायिकारणनाशजन्यत्वनियमाद् द्रव्योत्पत्तावसमवायिकारणसंयोगस्यापेक्षि-
तत्वेन चाद्यहेतुना ऽलीकत्वरूपकृतकत्वस्य द्वितीयहेतुना नित्यत्वस्य चेति विरुद्धयोर्द्व-
योरापत्तेरित्यर्थः ।

‡ अनुभवकर्मत्वे ऽपि आशुतरविनाशित्वेनैककालिकत्वाभावेऽसमवायिकार-
णसंयोगाश्रयत्वानुपपत्तेः ।

§ साहित्यावगाहिज्ञाने ।

|| वाक्यमेव ।

¶ मानसज्ञानविषयप्रयत्नभेदेन जनितैर्भिन्नैर्नानाध्वनिभिः प्रत्येकमभिव्यङ्ग्यं स्फोट-
रूपं परमार्थसदित्यर्थः । तथा च वाक्यपदीये काण्डे १ श्लो० ७८ शब्दस्योर्ध्वमभिव्य-
क्तेर्वृत्तिभेदे तु वैकृताः । ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते । श्लो० ८९
प्रत्येकं व्यञ्जका भिन्ना वर्णा वाक्यपदेषु ये । तेषामत्यन्तभेदे ऽपि संकीर्णा इव शक्तयः
इति ।

ञ्जकानेकविधध्वनिसादृश्येनान्योन्यविसदृशतत्तत्पदवाक्यसादृश्यापादय-न्तः* सादृश्योपधानभेदा† देकमप्यनवयवमपि नानावर्णात्मेव साव-यवमिव चाभासयन्ति मुखमिव मणिकृपाणदर्पणादयो नियतस्थानवर्ण-परिमाणसंस्थानमनुपप्लवमेकमनेकमिवानेकस्थानवर्णपरिमाणसंस्थानभेदो-पप्लव ‡ मिवादर्शयन्ति । न च प्रत्येकमभिव्यञ्जकत्वे ध्वनीनां प्रथमादेव ध्वनेर्वेद्यस्य प्रतीतेरुत्पत्तेस्तन्मात्रनिबन्धनत्वाच्चार्थप्रत्ययोत्पादस्य द्वि-तीयादीनामानर्थक्यं ध्वनीनामिति युक्तम् । व्यञ्जयन्तो ऽपि हि प्रत्ये-कमिमे ध्वनयो न द्रागित्येव स्फुटतरं स्फोटात्मानमवभासयितुमीशते ऽपि त्वारूपमवभासयन्ति§ पूर्वपूर्वाभिव्यक्तिजनितसंस्कारसचिवोत्तरा-भिव्यक्तिक्रमेण त्वन्त्यो ध्वनिः स्फुटतरविनिर्भासस्फोटबिम्बज्ञानमाधत्त इति न वैयर्थ्यं द्वितीयादिध्वनीनाम् । नापि पूर्वेषां तदभावे तदभि-व्यक्तिजनितसंस्काराभावेनान्त्यस्य ध्वनेरसहायतया व्यक्तावभासवाक्य-धीहेतुभावाभावात् । तद्यथा रत्नपरीक्षिणः पुनः पुना रत्नस्वरूपं वीक्ष-माणस्य रत्नदर्शनानि प्रत्येकं रत्नस्वरूपमवगाहमानान्यपि न सहसैव समानासमानजातीयव्यावृत्तं रत्नतत्त्वमवभासयन्ति किं तु पञ्चषदर्श-

---

* परस्परं विसदृशानामपि तेषां तेषां पदानां वाक्यानां वा व्यञ्जका ये ऽने-कविधा ध्वनयस्तेषां तुल्यस्थानकरणजत्वेन सादृश्यात्तदभिव्यञ्जनीयपदवाक्ययोरभेदेन भिन्नयोरपि सादृश्यप्रयोजका इत्यर्थः । अर्थभेदाच्छब्दभेदस्य नित्यस्फोटवादिनः शब्दा-र्थतादात्म्यवादिनश्चेष्टतया हर्यादिपदेषु श्वेतो धावतीत्यादिकेषु च द्व्यर्थकेषु पदेषु वाक्येषु चाभिव्यञ्जकध्वनिसादृश्यमूल एव तथा व्यवहार इति भावः ।

† हकाराद्यभिव्यङ्ग्यत्वेनैव सादृश्यस्य निरूपणीयतया हकारादिवैशिष्ट्यज्ञाने नानाध्वनिविषयकतया तद्गतनानात्वस्यापि प्रतिभासात् स्फोटस्य नानात्वसावयव-त्वयोः प्रतिभास इति भावः ।

‡ अनेके स्थानं वर्णः परिमाणं संस्थानभेदः उपप्लवश्च यस्य तम् । मुख-स्यैकत्वे ऽपि दर्पणाद्याधारभेदाद् यथा सामीप्यदूरस्थत्वादिस्थानस्य मालिन्यादेर्वर्णस्या-ल्पत्वमहत्त्वपरिमाणस्य वक्रत्ववर्तुलत्वादेः संस्थानभेदस्यावयवसंनिवेशविशेषरूपस्य दर्प-णादिनाशेन नाशस्य चारोपस्तथा स्फोटेपीति ।

§ ईषद्रूपमस्फुटमिति यावत् । तथा च शास्त्रदीपिकायाम् । न कश्चिदपि नादो ऽस्य स्फुटाभिव्यक्तिं करोति किं तु सर्वे ते प्रत्येकं व्यञ्जकाः स तु न द्रागेव स्फु-टमवभासते प्रथममस्फुटावभासितः सन् पुनः पुनः श्रूयमाणः स्फुटो भवतीति । अ० ५ पा० १ सू० ५ प० ७१ ।

नवनितभावबासचिवचेतोलब्धजन्मनि चरमे चेतसि चकास्ति रखतत्त्वम् ।
न च वर्णावभासा मिथ्याप्रत्ययास्तत्संस्कारा वा कथं व्यक्ततया परि-
च्छित्तिहेतव इति सांप्रतम् । आराद्वनस्पतेः *हरितप्रवाहस्य* व्यक्ततरं
वनस्पतितत्त्वप्रतीतिहेतुत्वदर्शनात् । वर्णाच्च समारोपितदीर्घत्वादिध-
र्मभाजः पारमार्थिकार्थधीभेदोपलम्भात् । तथा हि लौकिका नग इति
गिरिमपदिशन्ति नाग इति हस्तिनम् । अजिनमिति चर्म अजीनमिति
ज्यानिविहीनम् । शुन इति कर्मभूतान्सारमेयान् शून इति तु वृद्धि-
मापन्नम् । न चैते भ्रान्तयः व्यवहाराविसंवादात् ।

यस्तु स्वसिद्धान्ताभ्यासाहितव्यामोहापस्मारः† सर्वजनीनमपि प-
दमिति वाक्यमिति चैकविषयमनुभवमपजानीते स इत्थं शिक्षयितव्यः वत्स
वेत्सि तावच्छब्दादर्थधीरुदयत‡ इति सेयं वर्णातिरिक्तैकपदवाक्यानुभव-
मन्तरेण नोदेतुमर्हति नो खल्विमां विधातुमुत्सहन्ते वर्णाः विकल्पा-
सहत्वात् । ते हीमां प्रत्येकं वा विदधीरन् नागदन्तादय शिक्यावलम्बनं
मिलिता वा ग्रावाणइव पिठरधारणम् । न तावत्प्रत्येकमनुपलम्भविरो-
धात् । वर्णान्तरोच्चारणानर्थक्यप्रसङ्गाच्च । नापि मिलिताः तथाभावा-
भावात् । तथा हि । वास्तवो वा समूह एतेषामाश्रीयते अनुभवोपाधि-
को वा । तत्र सर्वेषामेव वर्णानां नित्यतया विभुतया च वास्तवी सङ्ग-
तिरतिप्रसङ्गिनी केषांचिदेव पदवाक्यभावं नापादयितुमर्हति । अनु-
भूयमानानां त्वनुभवानुसारिणी तत्पर्यायेण पर्यायवर्ती न समूहभावम-
वति । न खल्वेकदेशकालानवच्छिन्नाः समूहवन्तो भवन्ति भावाः अति-
प्रसङ्गात् ।

पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितो ऽन्त्यो वर्णः प्रत्यायको ऽर्थ-
स्य§ तेन तथैव एकानुभवकल्पनेति चेद् न । विचारासहत्वात् । को नु ख-

* दूरस्थवृक्षे हरिततृणसमूहज्ञानधाराया इत्यर्थः ।

† स्वसिद्धान्ताभ्यासाहितव्यामोहापस्मार इति ३ पुस्तके पाठः ।

‡ उदीयत इति ३ पु॰ पा॰ ।

§ तथा च वाक्यपदीये काण्डे॰१ श्लो॰ ८५ नादैराहितबीजायामन्त्येन ध्वनि-
ना सह । आवृत्तपरिपाकायां बुद्धौ शब्दो ऽवधार्यत इति ।

ऽञ्जकानेकविधध्वनिसादृश्येनान्योन्यविसदृशतत्तत्पदवाक्यसादृश्यापादयन्तः* सादृश्योपधानभेदा† देकमप्यनवयवमपि नानावर्णात्मेव सावयवमिव चाभासयन्ति मुखमिव मणिकृपाणदर्पणादयो नियतस्थानैकवर्णपरिमाणसंस्थानमनुपप्लवमेकमनेकमिवानेकस्थानवर्णपरिमाणसंस्थानभेदोपप्लव‡मिवादर्शयन्ति । न च प्रत्येकमभिव्यञ्जकत्वे ध्वनीनां प्रथमादेव ध्वनेर्वाक्यस्य प्रतीतेरुत्पत्तेस्तन्मात्रनिबन्धनत्वाच्चार्थप्रत्ययोत्पादस्य द्वितीयादीनामानर्थक्यं ध्वनीनामिति युक्तम् । व्यञ्जयन्तो ऽपि हि प्रत्येकमिमे ध्वनयो न द्रागित्येव स्फुटतरं स्फोटात्मानमवभासयितुमीशते ऽपि त्वारूपमवभासयन्ति§ पूर्वपूर्वाभिव्यक्तिजनितसंस्कारसचिवोत्तराभिव्यक्तिक्रमेण त्वन्त्यो ध्वनिः स्फुटतरविनिविष्टस्फोटबिम्बज्ञानमाधत्त इति न वैयर्थ्यं द्वितीयादिध्वनीनाम् । नापि पूर्वेषां तदभावे तदभिव्यक्तिजनितसंस्काराभावेनान्त्यस्य ध्वनेरसहायतया व्यक्तावभासवाक्यधीहेतुभावाभावात् । तद्यथा रत्नपरीक्षिणः पुनः पुना रत्नस्वरूपं वीक्षमाणस्य रत्नदर्शनानि प्रत्येकं रत्नस्वरूपमवगाहमानान्यपि न सहसैव समानासमानजातीयव्यावृत्तं रत्नतत्त्वमवभासयन्ति किं तु पञ्चषदर्श-

---

* परस्परं विसदृशानामपि तेषां तेषां पदानां वाक्यानां वा व्यञ्जका ये ऽनेकविधा ध्वनयस्तेषां तुल्यस्थानकरणजत्वेन सादृश्यात्तदभिव्यञ्जनीयपदवाक्ययोरभेदेन भिन्नयोरपि सादृश्यप्रयोजका इत्यर्थः । अर्थभेदाच्छब्दभेदस्य नित्यस्फोटवादिनः शब्दार्थतादात्म्यवादिनश्चेष्टतया हर्यादिपदेषु श्वेतो धावतीत्यादिकेषु च द्व्यर्थकेषु पदेषु वाक्येषु चाभिव्यञ्जकध्वनिसादृश्यमूल एव तथा व्यवहार इति भावः ।

† हकाराद्यभिव्यङ्ग्यत्वेनैव सादृश्यस्य निरूपणीयतया हकारादिवैशिष्ट्यज्ञाने नानाध्वनिविषयकतया तद्गतनानात्वस्यापि प्रतिभासात् स्फोटस्य नानात्वसावयवत्वयोः प्रतिभास इति भावः ।

‡ अनेके स्थानं वर्णः परिमाणं संस्थानभेदः उपप्लवश्च यस्य तम् । मुखस्यैकत्वे ऽपि दर्पणाद्याधारभेदाद् यथा सामीप्यदूरस्थत्वादिस्थानस्य मालिन्यादेर्वर्णस्याल्पत्वमहत्त्वपरिमाणस्य वक्रत्ववर्तुलत्वादेः संस्थानभेदस्यावयवसंनिवेशविशेषरूपस्य दर्पणादिनाशेन नाशस्य चारोपस्तथा स्फोटेपीति ।

§ ईषद्रूपमस्फुटमिति यावत् । तथा च शास्त्रदीपिकायाम् । न कश्चिदपि नादो ऽस्य स्फुटाभिव्यक्तिं करोति किं तु सर्वे ते प्रत्येकं व्यञ्जकाः स तु न द्रागेव स्फुटमवभासते, प्रथममस्फुटावभासितः सन् पुनः पुनः श्रूयमाणः स्फुटो भवतीति । अ० १ पा० १ सू० ५ प० ७१ ।

तज्जनितभावनासचिवचेतोलब्धजन्मनि चरमे चेतसि चकास्ति एवतत्त्वम्।
न च वर्णावभासा मिथ्याप्रत्ययास्तत्संस्कारा वा कथं व्यक्ततया परि-
च्छित्तिहेतव इति सांप्रतम्। आराद्वनस्पतौ 'हरितप्रवाहस्य* व्यक्ततरं
वनस्पतितत्त्वप्रतीतिहेतुत्वदर्शनात्। वर्णाश्च समारोपितदीर्घत्वादिध-
र्मभाजः पारमार्थिकार्थधीभेदोपलम्भात्। तथा हि लौकिका नग इति
गिरिमपदिशन्ति नाग इति हस्तिनम्। अजिनमिति चर्म अजीनमिति
ज्यानिविहीनम्। शुन इति कर्मभूतान्सारमेयान् शून इति तु वृद्धि-
मापन्नम्। न चैते भ्रान्तयः व्यवहाराविसंवादात्।

यस्तु स्वसिद्धान्ताभ्यासाहितव्यामोहापस्मारः† सर्वजनीनमपि प-
दमिति वाक्यमिति चैकविषयमनुभवमपजानीते स इत्थं शिक्षयितव्यः वत्स
वेत्सि तावच्छब्दादर्थधीरुदयत‡ इति सेयं वर्णातिरिक्तैकपदवाक्यानुभव-
मन्तरेण नोदेतुमर्हति नो खल्विमां विधातुमुत्सहन्ते वर्णाः विकल्पा-
सहत्वात्। ते हीमां प्रत्येकं वा विदधीरन् नागदन्ता इव शिक्यावलम्बनं
मिलिता वा ग्रावाण इव पिठरधारणम्। न तावत्प्रत्येकमनुपलम्भविरो-
धात्। वर्णान्तरोच्चारणानर्थक्यप्रसङ्गाच्च। नापि मिलिताः तथाभावा-
भावात्। तथा हि। वास्तवो वा समूह एतेषामाश्रीयते अनुभवोपाधि-
को वा। तत्र सर्वेषामेव वर्णानां नित्यतया विभुतया च वास्तवी सङ्ग-
तिरतिप्रसङ्गिनी केषांचिदेव पदवाक्यभावं नापादयितुमर्हति। अनु-
भूयमानानां त्वनुभवानुसारिणी तत्पर्यायेण पर्यायवर्ती न समूहभाग्भ-
वति। न खल्वेकदेशकालानवच्छिन्नाः समूहवन्तो भवन्ति भावाः अति-
प्रसङ्गात्।

पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायकोऽर्थ-
स्य§ तेन तथैव एकानुभवकल्पनेति चेद् न। विचारासहत्वात्। को नु ख-

---

दूरस्थवृक्षे हरिततृणसमूहज्ञानधाराया इत्यर्थः।

† स्वसिद्धान्तामभ्यासाहितव्यामोहापस्मार इति ३ पुस्तके पाठः।

‡ उदीयत इति ३ पु॰ पा॰।

§ तथा च वाक्यपदीये काण्डे १ श्लो॰ ८५ नादैराहितबीजायामन्त्येन ध्वनि-
ना सह। आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यत इति।

स्त्वयं संस्कारो*ऽभिमत आयुष्मतः किं स्मृतिबीजमन्यो वा प्रोक्षणादिभ्य इव व्रीह्यादेः । न तावदन्त्यः । न ह्यसावसहभुवां वर्णानां जन्य एकः संभवति उक्तादेव प्रकारात् । वर्णैर्यथास्वं क्रमविशेषशालिभिरन्ये ऽन्ये जन्यन्ते संस्काराः तेषां च स्थेम्ना संभवत्यन्त्यवर्णसाचिव्यमभिधेयप्रत्ययजननायेति चेद् अहो बतास्य स्वपक्षदृष्टिपक्षपातः† यद् बहुतरादृष्टसंभारकल्पनाक्लेशमपि न चेतयते संस्कार एव तावदनुपलब्धपूर्वस्तस्य च नानात्वमिति । आग्नेयादिवत्कल्पनागौरवं न कल्पकगर्हिततां‡मावहतीति चेद् न इहान्यथासिद्धेः । आग्नेयादयो हि विशरारवो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति चिरभाविने फलाय विहिताः समिदादयश्च प्रोक्षणादयश्च तदङ्गान्यसहभावीनि इति बह्वपूर्वकल्पनां विना नोपपद्यन्तइति नासौ प्रमाणमार्गागतो दोषमावहति । इह पुनरेकगोचरानुभवमात्रादभिधेयप्रत्ययोत्पत्त्युपपत्तेरप्रामाणिकानेककल्पना न दोषमावहतीत्यचतुरस्रम् ।

वासनापरनामा संस्कारः स्मृतिबीजमन्त्यवर्णसहकारी तस्य च स्मरणफलप्रसवोन्नीतसद्भावस्यार्थधीजन्मनि सहकारितामात्रं कल्पनीयम् तच्च गौरवमिति चेद् न । स्वभावविपर्यासानुपपत्तेः अदृष्टान्तरकल्पनाप्रसङ्गाच्च । तथा हि । यो यद्गोचरानुभवयोनिः संस्कारः स तत्रैव धियमाधत्तइति तस्य स्वभावः यद्यन्यस्मिन्नप्यादधीत किं चिदेवैकमनुभूय सर्वः सर्वमर्थं विजानीयात्§। अपि च संस्कार इति च वासनेति च भावनेति च प्राचीनानुभवजनितमात्मनः सामर्थ्यभेदमेव स्मृतिज्ञानप्रसवहेतुमाचक्षते न चास्यैवा॥र्थप्रत्ययप्रसवशक्तिः शक्या कल्पयितुम् । सा खल्वभिधेयधीप्रसवोन्नीतसद्भावा फलवत्यात्मन्येव युक्ता कल्पयितुं न पुनरतद्रूपायामस्य स्मृतिजननशक्तौ¶ । यथा चेयं मानान्तरसिद्धैवमसावपि । न चात्मनि शक्तिक-

* अर्थसंस्कार इति ३ पु॰ पाठः । † स्वदृष्टिपक्षपात इति ३ पु॰ पा॰ ।
‡ लोकगर्हिततामिति ३ पु॰ पा॰ ।
§ तथा च वर्णस्मरणमेव स्यान्न त्वर्थस्मरणमिति भावः ।
॥ संस्कारस्यैव शक्तिरूपत्वेन तत्र शक्त्यन्तरकल्पनानवकाशादिति भावः ।
¶ स्मृतिजननमिति २ पु॰ पा॰ । बोधरूपफलरहितायां शक्तौ संस्कारस्य स्मृतिजनकत्वमनुपयोगात्कल्पयितुं न युक्तमित्यर्थः ।

ल्पनायां सत्यां तस्याश्चाशक्तायाः कार्यकरणाभावाच्छक्त्यन्तरकल्पना न तु स्मृतिप्रसवशक्ताविति सांप्रतम् । न हि कल्प्यमाना शक्तिः शक्त्यन्तरयुक्ता कल्प्यते तन्मात्रादेव फलसम्भवे शक्त्यन्तरकल्पनायामनवस्थापातात् स्मृतिप्रसवशक्तावपि च साम्यात् । यथा वा ऽदृष्टान्तरं मा नाम * कल्पनीयमिति तद्वत्† गौरवमापन्नम् ।

स्मृतिसमारोहिणो वर्णा वाचकास्तत्र गौरवमिति चेन्न । क्रमाक्रमविपरीतक्रमाणां तत्राविशेषेणार्थधीसमुत्पादनप्रसङ्गात् । अथापि स्यादयथास्वं वर्णानुभवैराहिताः संस्काराः संभूय निखिलवर्णविषयमेकमेव स्मरणं प्रसुवते तदुपारोहिणो वर्णा अव्यवधाना इत्यभिधेयधियमादधति । न चैकैकवर्णोपलब्धिप्रतिलब्धजन्मानः संस्काराः प्रतिवर्णगोचरास्तावतीरिव क्रमवतीः स्मृतीर्भावयितुमीशते तत्र तत्र निरपेक्षकारणभावोपलम्भात् ‡ न पुनरखिलवर्णगोचरं स्मरणमेकमिति रमणीयं तत्र तत्रानपेक्षाणां कारणत्वेपि मिलितानामप्यनेकगोचरैकविज्ञानजननदर्शनात् । तथा हि । यथा संस्कारश्चक्षुराद्यनपेक्षः स्मरणकारणं चक्षुरादयस्तन्निरपेक्षा आलोचनकारणम् । प्रत्यभिज्ञाने तु संस्कारसापेक्षाश्चक्षुरादयः । एवं तत्र तत्रोहनीयमिति न काचिददृष्टकल्पनेति तत्रास्ति§ । क्रमाभिव्यक्तिभ्यइव यौगपद्यविपरीतक्रमाभिव्यक्तिभ्यो ऽपि अभिधेयप्रत्ययप्रसङ्गात् । न खल्वेकोपलब्धिवर्तिनामस्ति कश्चिद्विशेषो वर्णानां न हि वास्तवः क्रमो नित्यानां विभूनां च तेषाम् । उपलब्धिनिमित्तस्त्वाश्रीयते सा चेदेका कुतस्तर्हि क्रम एतेषाम् । न च प्राचीनप्रत्येकवर्णानुभवनिचयमनुवर्तनीयं परापरताप्रतिभासत इति|| सांप्रतम् । वर्णस्वरूपमात्रगोचरतया स्मृति-

* तथा चादृष्टान्तरं नार्नेति ३ पु॰ पा॰ ।

† शक्तिरूपे संस्कारे शक्त्यन्तरकल्पनारूपम् ।

‡ निरपेक्षाणां कारणत्वेऽपि भावोपलम्भादिति २ पु॰ पा॰ । संस्कारान्तरनिरपेक्षेण प्रत्येकं संस्काराणां कारणत्वेन स्मृतिरूपफलदर्शनादित्यर्थः ।

§ तत्रास्तीति २ पु॰ पा॰ । तथा च सकलवर्णविषयकमेकं स्मरणं संभवतीति भावः । एतावत्पर्यन्तमाक्षेप उत्तरस्तु परिहारः ।

|| पदज्ञाने वर्णपौर्वापर्यप्रतिभासादनुभवगतक्रमविषयकत्वं स्मृतावङ्गीकार्यमिति भावः ।

रियं न तत्तदनुभवानपि गोचरयितुमर्हति तत्परापरतां तु प्रागेवेति युगपद्विपरीतक्रमाभिव्यक्तानां क्रमाभिव्यक्तेभ्यो विशेषाभावादेकोपलब्धौ सर्वेषामर्थप्रत्यायनप्रसङ्गः । तस्मात्स्वसिद्धान्ताभ्यासव्यामोहमपहायाभ्युपेयता * मनुसंहारबुद्धिरेकपदवाक्यगोचरा । न चास्या गोचरइव प्रत्येकध्वनि† व्यञ्जनीयस्तदर्थोपि प्रतिवर्णव्यञ्जनीय इति सांप्रतम् । प्रथमादेव वर्णादभिधेयधीसमुत्पादादानर्थक्यं द्वितीयादीनामित्युक्तम् । न चैतत्पदेपि तुल्यं तस्यैव हि‡ प्रत्यक्षस्य प्रतिध्वनिव्यञ्जनीयस्याभिव्यक्तितारतम्यं नानाध्वनिष्वायततइति नानर्थक्यमुत्तरेषाम् । न चैवमप्रत्यक्षे ऽभिधेये विधा संभवति प्रत्यक्षगोचरो ह्यभिव्यक्तितारतम्यभाग§ न मानान्तरगोचरः ‖ । स खलु गृह्यते वा न वा न पुनर्व्यक्तो ऽव्यक्तश्चेति ।

तदिदमसमञ्जसम् । तथा हि चक्षुषी निमील्य डिण्डिक्रमतरागं परित्यज्य निरूपयत्वत्रभवान्पूर्वबुद्धीरेकैकवर्णगोचरा उत्तरां च विशदपदवाक्यावगाहिनीं किमेता गादिबुद्धयो गकारादिमात्रनिर्भासा आहो स्विद् गकाराद्याकारं किंचिदेकमासु संप्लवते मुखमिव मणिकृपाण¶दर्पणादिषु भिन्नवर्णपरिमाणसंस्थानमेकमितरथा तत्र मुखमिति बुद्धिव्यपदेशावभिन्नवस्तुग्राहिणौ न स्याताम् । न संप्लवते चेद्गादय एव परस्परानात्मानः प्रकाशन्ते न पुनस्तदाकारं पदतत्त्वमेकं न जातु गजगवयहयरासभरुरवः परस्परव्यतिभिद्यमानमूर्तयो ऽवभासमाना रासभादिविवर्ता भवन्ति । संप्लवते चेद् अस्ति हि गकारादिषु भिन्नेषु अभिन्नवस्तुनिर्भासा शब्दःशब्द इति प्रख्या लौकिकपरीक्षकाणां तत्किं शब्दत्वमेव वाचकमभिधेयभेदानां तथा च तस्य सर्वत्राविशेषात्सर्वेर्थाः सर्वशब्देभ्यः प्रतीयेरन् । न खलु

* अभ्युपेयतामिति ३ पु॰ पा॰ ।
† ध्वनिशब्दो नास्ति ३ पु॰ पा॰ ।
‡ तस्य हीति ३ पु॰ पा॰ ।
§ भाग् मानान्तरगोचरः न खल्विति ३ पु॰ पा॰ ।
‖ प्रत्यक्षगोचरो ह्यभिव्यक्तितारतम्यभाग् न मानान्तरगोचरः स खल्वि॰ ३ पु॰ पाठः श्लिष्टः । २ पु॰ भाग् मानान्तरगोचरः । न खल्विति पाठः ।
¶ मानकृपाणेति ३ पु॰ पा॰ ।

कारणानियमे कार्य्यनियमो भवितुमर्हति तस्याकस्मिकत्वप्रसङ्गात् । गकाराद्याकारविवर्तभेदं शब्दत्व*मभिधेयभेदाभिधायकं तत्रातिप्रसङ्ग इति चेद् न । प्राप्ताप्राप्तविवेकेन गादीनामेवाभिधेयधीहेतुत्वात् । अन्यथा सत्त्वगुणत्वादीनामपि तत्प्रसङ्गात् । अत्यल्पमिदम् अखिलमेव कार्यसामान्य†जातं सत्त्वसामान्यनिर्माणं प्रसज्येत । अपि च शब्दः चरमविज्ञानइव पूर्वेष्वपि विज्ञानेषु प्रथतइति नास्ति तिरोहितमिव किं चिदिति तेभ्यो ऽपि अर्थप्रत्ययप्रसङ्गः । एतेन वर्णत्वमपि परास्तमभिधेयधीहेतुभावेन वेदितव्यम् । तदिह कृतं कृतधियामप्रामाणिकेन शब्दत्वसामान्यनिराकरणप्रयासेन । न च शब्दत्वमेकं वस्तुमत्तद्विदमकारादिनान.त्वभाविकत्वविरोधि येन तद्व्यविकत्वाय ‡ शब्दत्वमपाक्रियते । शाबलेयादिभेदव्यवस्थापनाय गोत्वादिनोपि सामान्यस्यापाकरणप्रसङ्गात् । शाबलेयादिभेदेषु गौर्गौरित्येकाकारावभासादशक्यापह्नवं तदिति चेद् न । इहापि समानत्वात् । न खलवचि § व्यञ्जनेषु च शब्दः शब्द इत्येकनिर्भासः प्रकाशो नास्ति लौकिकपरीक्षकाणाम् । न चैष श्रोत्रग्रहणोपाधिः विना ऽपि शब्दत्वमेकमिति सांप्रतम् । तद्ग्रहणानामपि नानात्वेनैकप्रत्ययाधानासामर्थ्यात् । श्रोत्रयाह्यत्वोपाधेश्चा|| त्यन्तपरोक्षतया तद्गृहीतिविरहे शब्दः शब्द इत्येकनिर्भासप्रकाशानुपपत्तेः । अगृहीतस्योपाधेरुपहितप्रत्ययाधानासामर्थ्यात् । न च गकारादिषु अनुस्यूतमश्वादिपदव्यावृत्तमेकमवर्णावगाहिनीषु प्रख्यासु तिरोहितमिव प्रथते । कथं न प्रथते यदा विशदपदावगाहिनि गौरित्येकं पदमिति चरमे चेतसि पूर्वापलब्धभागप्रतिसंधानमस्ति । न चास्यैते भागा इत्यायुष्मतैवोपपादितम् । अतस्तद्विवर्ताः । तथा च तदेव तेन तेनापरमार्थसता गकाराद्याकारेण प्रतिभासतइति प्रमाणमार्गागतम् ।

---

* भेदयच्छब्दमिति २ पु॰ पा॰ । गकाराद्याकारैरारोपितैर्भिद्यमानः शब्दो यत्र तत्त्वं पदं वाक्यं वेति तस्यार्थः ।

† सामान्येति ३ पु॰ नास्ति ।

‡ गत्वादेर्वस्तुत्वसिद्धये ।

§ अस्विति ३ पु॰ पा॰ ।

|| श्रोत्रस्य चेति ३ पु॰ पा॰ ।

तत्किमिदानीमनुसंहारबुद्धिप्रतिसंधानापेक्षाः प्राञ्चः प्रत्यया यथास्वं गकारादिष्वनुविद्धमेकमवभासयन्ति । श्रोमिति चेत्, हन्त तत्र तत्र चरमविज्ञानसमये 'प्राचां प्रत्ययानामतिवृत्तत्वात्तत्काले* चरमस्य चेतसोऽनागतत्वात् उपकरोति असतामसन्निति चैवमापतितम् । अपि च जन्ममात्रव्यापारत्वेन विज्ञानस्य जातस्य† जन्माभावेन विरम्य व्यापारायोगात्तद्विपरीतं चाभ्युपेतं स्यात्‡ । अनपेक्षाश्च § प्राञ्चः प्रत्ययाः स्तम्भकुम्भाम्भोरुहावगाहिनइवाभिवानुव्याधविरहिणः स्वानुभवद्वासमाना न परस्परं स्वगोचरं भिन्दन्ति ‖ नाप्यनानुभविकः प्रत्ययेष्वेकानुव्याधः शक्यानुमानः नरविषाणवदनुपलब्धिविरोधात् । तथा च परस्परव्यावृत्तवर्णमात्रगोचरा अनुभूतयो भावनोपजननद्वारा नाना वैकं वा स्मृतिप्रत्ययं स्वगोचर एवादधते नान्यगोचरे नाप्यगोचरइति । अनुसंहारबुद्धिरपि¶ परस्परव्यावृत्तवर्णरूपावगाहिनी न तु वर्णानुव्याधवदेकगोचरेत्यनुभवमार्गागतम् ।

कथं गौरित्येकं पदमित्येकपदावभासिनी धीरस्ति लौकिकपरीक्षकाणाम् । न चेयमनालम्बना नापि वर्णालम्बना तेषां नानात्वात् । नापि सेनावनादिवदौपाधिकी । उपाधिः खल्वेकविज्ञानविषयता वा भवेद् एकाभिधेयप्रत्ययहेतुता वा । न तावत्पूर्वः पक्षः । अप्रतीतोपाधेरुपहितप्रत्ययायोगात् । स्वसंवेदनं संवेदनमनिच्छतामनुसंहारबुद्ध्या स्वरूपाग्रह-

* आद्यवर्णज्ञानकाले । चरमनादाभिव्यञ्जनीयस्य स्फोटस्याद्यवर्णप्रत्यक्षकालेऽसत्त्वादसत उपकार्यत्वं चरमवर्णकाले चाद्यानां नाशादसत उपकारकत्वं चापद्यत इत्यर्थः ।

† ज्ञातस्येति ३ पु॰ पा॰ ।

‡ ज्ञानानामुत्पत्त्यैवार्थप्रकाशकत्वात्तृतीयक्षणे नाशाच्च प्रथमवर्णज्ञानस्यास्फुटपदत्त्वाभिव्यञ्जकत्वं चरमवर्णज्ञानसाचिव्येन तस्यैव स्फुटाभिव्यञ्जकत्वमिति न युक्तमिति भावः ।

§ अनपेक्षाः अनुसंहारबुद्धिप्रतिसंधाननिरपेक्षाः । समुदायबुद्ध्यसहकृता इति यावत् ।

‖ न भिन्दन्ति न व्यावर्तयन्ति । तथा च गोगवयगीतादिप्रत्ययेष्वाद्यप्रत्ययैःस्फुटत्वेनेष्टा अपि परस्परव्यावृत्तरूपगवादिपदस्फोटाभिव्यक्तयोऽनुपपन्ना इति भावः ।

¶ समुदायात्मकपदस्वरूपज्ञानमपि ।

णा * तदेकत्वाग्रहात्तदुपाध्येकपदप्रतिभासानुपपत्तेः । उभयस्मिन्नपि पक्षे परस्पराश्रयप्रसक्तिर्दुर्वारा । न खल्वविदितपदरूपावधिरर्थमवैति । अवध्य-न्तरपरिग्रहे तत्त्वेऽपि वर्णानां तदर्थभेदानध्यवसायात् † । तत्रार्थप्रतिपत्त्या पदरूपविशेषमुपकल्पयतो दुरुत्तरमितरेतराश्रयं प्रसज्येत । न चैकार्थसम्ब-न्धाख्यानमेकपदत्वमापादयति । वर्णानामनाश्रितपदरूपाणामप्रत्यायक-त्वेनासम्बद्धानां सम्बद्धाख्यानानुपपत्तेः ‡ । सम्बन्धाख्यानात्तु पदभावे तदे-वेतरेतराश्रयत्वमापद्यते । पदत्वाद्धि सम्बन्धित्वे सत्याख्यानमाख्यानाच्च पदत्वे सति सम्बन्धितेति । अवस्थितं हि वाचकत्वमाख्यायते । अपि च एकावभासस्य प्रत्ययस्योपाधिकत्वमिच्छतो न किं चिदेकं भवेत्सर्वस्यैव कथं चित्कस्य चिदुपाधेः सम्भवात् । तथा च नानाऽपि न स्याद् एक-समाहारात्मकत्वान्नानात्वस्य ।

अत्र ब्रूमहे । न वयमेकावभासप्रत्ययमेकवस्तुव्यवस्थितौ प्रमा-णयामः किं तु व्यपदेशमात्रं भवति हि करितुरगादिष्वश्वत्थ § च-म्पकाशोकखदिरधवकिंशुकादिषु नानात्वेऽपि कथं चिदेकमुपाधि-माश्रित्य सेना वनमिति व्यपदेशमात्रं लौकिकानाम् । न चैतावता सेना वनं वा करिचम्पकाद्यवयवसमवाय्येकमवयवि प्रसिध्यति । तथैव गकारादयोऽपि पूर्वापरलब्धिविपरिवर्तिनो रूपादूनानधिका एकस्यां स्मृतौ प्रथमानाः सत्यपि पदमिति व्यपदेशभेदे नैकानुव्याधवन्तो भवितुमर्हन्ति उपाधिविरहात् । एकानुव्याधमुपकल्पयति व्यपदेश इति चेद् न इतरेतराश्रयापत्तेः । एकानुव्याधवती हि प्रख्या तादृशव्यपदेशो-त्पादिनी बुद्धिनिबन्धनत्वात् || व्यपदेशस्य । ततस्तु तामर्थयमानो व्यत्कासि-

* ज्ञानेन स्वस्याविषयीकरणात्तस्यानुव्यवसायग्राह्यत्वात् ज्ञाततालिङ्गानुमेय-त्वाद्वेति भावः ।

† पदत्वमनपेक्ष्य समुदायत्वादिधर्मान्तरपुरस्कारेण पदज्ञानेऽपि अर्थानां व्या-वृत्तानामनुपस्थितेः । सामान्यतः पदत्वज्ञानेनार्थत्वेनार्थोपस्थितिः स्यादपीति भावः ।

‡ असंबन्धानां संबन्धाख्यानानुपपत्तेरिति २ पु॰ पा॰ ।

§ अश्वत्थेति २ पु॰ नास्ति ।

|| बुद्धिनिमित्तत्वादिति ३ पु॰ पा॰ ।

तरेतराश्रयत्व*माविशति । न चाचोपाधिविरहो ऽपि । अस्ति खल्वेकाभिधेयधीहेतुभाव† स्तयाणामपि वर्णानामेकस्मरणसमारोहिणां चावृणाभिर्वैकपिठरधारणे यस्मात्पदमिति व्यपदेशः प्रभवति । न चैवमन्योन्याश्रयं न हि पदावधारणाधीनः सम्बन्धबोधः किं तु तदधीनं पदविज्ञानम् । कारकभेदावधायि‡ हि पठपदं पद्यते ऽनेनेति व्युत्पत्त्या । तच्छब्दाश्च कार्य्यसम्बन्धबोधोपहितसीमानो§ नासति तस्मिन्प्रवर्तितुमीशते । न च, स्वरूपभेदस्तावतां तादृशां वर्णानां वर्णान्तरेभ्यस्तेभ्य एव वा ऽतावद्भ्यस्तावद्भ्यो वा ऽतादृशेभ्यो|| न्त्यविज्ञानेऽप्यारोहिणामर्थप्रत्ययात् प्राग् न प्रथते येन सम्बन्धिभेदाग्रहे सम्बन्धो न निरूप्येत । प्रकारान्तरवद्भ्यस्तु तेभ्यस्तेषामेव चरमविज्ञाननिवेशिनां विशेषमयं वेदयामः ।

तथा सम्बन्धबोधनाख्यानमप्यमीषामीषत्करं समधिगतैकाभिधेयधीहेतुभावानां च तेषां पश्चात्पदमिति व्यपदेशो नानुपपन्नः । अपि चानंशस्य पदस्य वैशद्याऽवैशद्ये न युज्यते । सामान्यविशेषतत्त्वाभ्यामनुभूयमानता हि वैशद्यं सामान्यमात्रस्य तद्गुणमात्रस्य वा वेदनमवैशद्यं न च निखिलसामान्यविशेषविरहिणः स्फोटस्यास्फुटं दर्शनमुपपद्यते । स खलूपलभ्यते नोपलभ्यते¶ । न ह्यस्य दृश्यमानस्यास्ति किंचिददृश्यमानम् । न चास्ति सम्भवः स एव* तेनैव तदैव दृश्यते न चेति । अत एव न समारोपः सर्वथा ऽननुभूते तदयोगात् । कथं चिदनुभवे† निरंशत्वानुपपत्तेरपसिद्धान्तप्रसङ्गात् । तस्मादनवयवमेवानुभूयते पदतत्त्वमिति रिक्तं वचः । अत

---

* इतरेतराश्रयमिति ३ पु· पा· । † हेत्वभाव इति ३ पु· प· ।

‡ कारकभेदाभिधायीति ३ पु· पा· । कारकविशेषाभिधायकम् ।

§ कार्यो यः संबन्धबोधः तेन प्रापिता पदभेदरूपा सीमा अवधिर्येषां तादृशा इत्यर्थः ।

|| भिन्नानुपूर्वीकेभ्यः । अर्थज्ञाननैरपेक्ष्येणैव नदीदीनादिपदेषु स्वरूपभेदः प्रत्यक्षसिद्ध एवेति भावः ।

¶ न खलूपलभ्यते न चोपलभ्यत इति ३ पु· पा· । नोपलभ्यते वेति विकल्प्य वक्ष्यमाणं दूषणद्वयं योजनीयम् ।

* स एवेति ३ पु· पा· ।

† एकदेशावच्छेदेन प्रत्यक्षत्वाङ्गीकारे ।

एव शब्दादर्थं* प्रतिपद्यामहे इति सपिशाचवटेतिह्यवदनुभूयमानार्थवर्त्तनमननुभवाभावात् । अनुभव एव हि प्रमाणमार्गागतो लोकस्वत्वाश्वलोकनात्† । न पुनः पुरुषप्रवादमात्रं मृषावादो ऽपि हि सम्भवति वटयक्षवत् । यदि त्ववश्योपपादनीयं ततो वरं शब्दशब्दोपलक्षितानां वर्णव्यक्तीनामेकस्मृतिसमारूढानामेकाभिधेयप्रत्ययोपजननलब्धसहभावानामभिधकारकावस्थापादिताभेदानामेकत्वादेकवचनमुपपद्यतां‡ गोशब्दादिवि§ । न च धवखदिरपलाशा वृक्ष इति लोके न दृश्यते इति दृश्यमानमेतदपह्नवमर्हति|| दर्शनादर्शनयोर्लोकसिद्धत्वेन तुल्यबलतया बाध्यबाधकभावाभावेन¶ विषयव्यवस्थोपपत्तेः** । न चाप्रत्यक्षमपि अर्थधीकार्येण शक्यानुमानम् अन्योन्याश्रयात् । न खलु सत्तामात्रेण शब्दो ऽभिधेयधियमाधातुमर्हति । सत्तया ऽभिधायकत्वे तस्याः शाश्वतिकतया नित्यमाधानप्रसङ्गादिति । अतश्च स्वज्ञानं†† तद्धेतुरेपितव्यः । स्वज्ञानं चास्यार्थप्रत्ययलक्षणलिङ्गप्रसवमिति प्राप्तमन्योन्याश्रयम् । अपि च वर्णेभ्यो नाभिधेयप्रत्ययो नोपपद्यते । ते हि गौरिति स्मृतिबुद्धावेकस्यां विपरिवर्तमाना अभिधेय)‡‡ प्रत्ययस्य गते§§ । न चास्यां|||| क्रमाक्रमविपरीतक्रमानुभूतानामविशेषो वर्णानाम् । तथा हि । प्राचीनानुभवभावितभावनानिचयलब्धजन्मा स्मृतिरनुभवानुसारिणी तद्गोचरानक्रमानपि तत्क्रमेण क्रमवदनुभवक्रमेतोप-

* शब्दार्थमिति ३ पु॰ पा॰ ।

† लोकसंवादेन तत्र प्रामाण्याङ्गीकारात् ।

‡ उपपद्यतामिति ३ पु॰ पा॰ ।

§ गोशब्दादिष्वित्येकवचनमुक्तक्रमेणैकत्वव्यवहारमात्रोपपत्तेरुपपद्यतामित्यर्थः ।

|| धवादिषु वनत्वं प्रत्येकं न पर्याप्नोति वृक्षत्वं तु पर्याप्नोतीति विशेषाद् वनमित्येकवचनमेव वृक्षा इति बहुवचनमेव यथा तथा प्रकृते शब्दत्वस्य प्रत्येकपर्याप्ततया शब्दा इति बहुवचनमेव युक्तं न त्वेकवचनमित्याद्याशयः ।

¶ अविषयव्यवस्थोपपत्तेरिति ३ पु॰ पा॰ ।

** यथा तैलत्वस्य प्रतिबिन्दुपर्याप्तत्वे ऽपि कदा चित् प्रस्थमात्रे ऽपि तैलमित्येकत्वव्यवहारः कदा चित्तु तैलानि हेमन्ते सुखानीत्यादिव्यवहारश्च लोकसिद्धत्वेन न विरुद्धस्तथेहापीति भावः ।

†† स्वज्ञानेनेति ३ पु॰ पा॰ । ‡‡ एतन्मध्यस्थं २ पु॰ नास्ति ।

§§ २ पु॰ पाठे वर्णमात्रेणार्थोपस्थितौ न समर्था लोका इति शेषः ।

|||| अस्यां स्मृतौ ।

संस्थानपर्यायमपि समाकलयन्ती अक्रमविपरीतक्रमानुभूतिभ्यो भिनत्ति । दृश्यते हि नदीदीनेतिस्मृतिधियोरभेदे ऽपि वर्णरूपाणां विशदतरः पदभेदः । न चेदमनवयवपददर्शनर्मिति निवेदितम् । तदनुभवकर्मताक्रमः परमवशिष्यते * सो ऽपि न्यूनातिरेकादिवदेकपदभेदावधारणोपायः । यथा ऽऽहुरत्रभवन्तो वार्त्तिककाराः † ।

पदावधारणोपायान्बहूनिच्छन्ति सूरयः ।
क्रमन्यूनातिरिक्तत्वस्वरवर्ण ‡ श्रुतिस्मृतीरिति ॥

न च निरन्तरमतिसदृशस्वरबहुवक्तृप्रयुक्तेष्वानुपूर्व्यवत्सु समानस्मृतिबुद्धिसमारोहिष्वर्थप्रत्ययादर्शनाद्व्यभिचार इति सांप्रतम् । एकवक्तृप्रयुक्तत्वेन § विशेषणात् । यथा ऽऽहुः ॥ ।

यावन्तो यादृशा ये च यदर्थप्रतिपादकाः ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधका इति ॥

¶ न चैतत्कलकलश्रुतावशक्यज्ञानं किमिव हि दुष्करमभ्यासस्य यथा ऽऽहुर्बाह्या अपि ** ।

परेषामनुपाख्येयमभ्यासादेव जायते ।
मणिरूपादिषु ज्ञानं तद्विदामानुमानिकमिति ॥

न च संबन्धाख्यानसमयैकवक्तृकताया अनाश्रया †† दनङ्गत्वं हेत्वसिद्धेः । स्फुटतरतया तदनाख्यानं न खलु नैरन्तर्यादयो ऽप्याख्यायन्ते तद्भावस्तु नैरन्तर्यादिष्विव वक्तृकत्वे ऽपि समानः । न च ज्ञापकहेतुर्विदितसमस्तज्ञापकाङ्गो ज्ञापयतीत्यप्यकान्तिकम् । भवति हि मनो ऽनुमा-

---

* परिशिष्यतइति ३ पु० पा० ।

† श्लोकवार्तिके वाक्याधिकरणे अ० १ पा० १ श्लो १८० ।

‡ स्वरवाक्येति ३ पु० पा० । मुद्रिते श्लोकवार्तिकपुस्तके ऽप्येवमेव ।

§ एकवर्गप्रयुक्तत्वेनेति ३ पु० पा० ।

|| श्लोकवार्तिके संबन्धाक्षेपवार्तिके अ० १ पा० १ सू० ५ श्लो० ६६ ।

¶ तथा च तेषां गुणभूतानामर्थप्रत्यायनं प्रति साहित्यमेकवक्त्रादिक्रमश्चापि विवक्षितइतीत्यधिकम् ३ पु० ।

** वाक्यपदीये काण्डे १ श्लो ३५ । मुद्रितपुस्तके परेषामसमाख्येयमिति मणिऽव्यादिविज्ञानमिति च पाठः ।

†† न्यूनाश्रयादिति ३ पु० पा० ।

नाङ्गम् । न चास्य वेदनमत्रोपयुज्यते । तदिह दृश्यमानेभ्य एव वर्णेभ्यो दृश्यमानप्रकारभेदानुयायिभ्योऽभिधेयप्रत्यय उपपद्यमानो नैतानवज्ञाय*नवयवमत्यन्ताननुभूतं पदतत्त्वमुपकल्पयितुमर्हति । अतिप्रसङ्गात् । नापि समभिव्याहृतपदाभिहितपदार्थप्रत्ययाधीनोत्पत्तिर्वाक्यार्थधीरन्यथोपपद्यमाना ऽनुभूयमानपरस्परव्यावृत्तमूर्तीनि पदानि अपहृत्यात्यन्तापरिदृष्टं बाह्यमेकमनवयवमवगमयति । तत्सिद्धमेतदर्थापत्तेरनुमानस्य वा निवृत्तिस्तदेकगोचरपदवाक्यस्फोटावभासिनीति† नानवयवमेकं वाक्यार्थावबोधकमिति ।

नापि द्वितीयः कल्पः । तथा हि ।

नान्त्यवर्णश्रुतिः स्मृत्यानीता वाक्यार्थबोधिनी ।
न स्मृतिस्तदपेक्षत्वाद्योगपद्यं न च तयोः ॥

स खल्वन्त्यो वर्णः पूर्वपूर्ववर्णपदपदार्थविज्ञानजनितभावनानिचयसचिवश्रवणेन्द्रियसमधिगतजन्मस्मरणग्रहणरूपावाप्तवैचित्र्यसदसद्वर्णनिर्भासप्रत्ययविपरिवर्ती‡ वाक्यार्थधीहेतुरुपेयते स च चरमपदतदर्थसम्बन्धस्मृतिमाधाय वाक्यार्थधियमादधीतानाधाय वा । आधाय चेत्तद्धेतुभावेनोद्बोधसमये स्वजन्यसंस्कारकारणविनाशघातश्रुति§रश्रूयमाणः संबन्धिस्मृतिसमये कथं तत्सहकारी‖ वाक्यार्थप्रत्ययमादधीत । न च तदसहकारिणो वाक्यार्थधीहेतुभाव इति सांप्रतम् । अस्मरणे तदनुभववैयर्थ्येनागृहीतसङ्गतेरपि प्रथमश्राविणो भिन्धि प्रासेन भिदुरमिति वाक्यार्थप्रत्ययप्रसङ्गात् । न चान्त्यवर्णोद्बोधितसंस्काराधीनजन्मा स्मृतिरनुभवेन

* नैवानवज्ञायेति ३ पु॰ पा॰ ।

† स्फोटाभावमाधनीति २ पु॰ पा॰ ।

‡ पूर्वपूर्ववर्णप्रत्यक्षजन्यानां संस्काराणां समूहः सहकारी यस्य तादृशेन श्रोत्रेण जनितः पूर्ववर्णांशे स्मरणरूपतया चरमवर्णविषये चानुभवरूपतया प्राप्तरूपद्वयः सतोऽन्त्यस्यासतां च पूर्ववर्णानां प्रकाशको यः प्रत्ययस्तद्विषय इत्यर्थः ।

§ संस्कारस्य स्मृतिनाश्यत्वात् स्मृतौ जातायां संस्कारनाशेन उत्तरज्ञानेन वज्ञाननाशात् वर्णप्रत्यक्षनाशेन चेति भावः ।

‖ तत्सहकारिणमिति २ पु॰ पाठः ।

सह युगपदुत्पत्तुमर्हति । न च न्याय्यो युगपदुत्पादः प्रत्ययानां करणस्य * प्रत्ययपर्याये सामर्थ्यात् । अन्यथा समानविषयबुद्धिधाराऽनुपपत्तेः † । सहसैव यावत्कर्तव्यकरणात्समर्थस्य क्षेपायोगात् । न च तावन्तं काल-मस्ति प्रथमोत्पन्नध्वनिजनितसंस्कारभेदो यतः पुनरपि वर्णविषयं विज्ञानं जनयेत् । यथा ऽऽहुः ।

क्षणिकं साधनं चास्य बुद्धिरप्यनुवर्तते ।
मेघान्धकारशर्वर्यां विद्युज्जनितदृष्टिवत् ॥

न चाननुभूयमानस्य सत्तामात्रेण बोधकत्वमित्यसकृदावेदितम् ॥ अस्तु तर्हि स्मृतिदर्पणारूढा वर्णमालैव वाक्यार्थधीहेतुः । वृद्धप्रयोगा-धीनावधारणो हि शब्दार्थसंबन्धः । न च पदमात्रं व्यवहाराङ्गं प्रयुञ्जते वृद्धाः । किं तु वाक्यं तच्चानवयवं न्यषेधीति ‡ स्मृतिसमारूढा वर्णमाला ऽवशिष्यते सा च नैमित्तिकं वाक्यार्थबोधमाधत्ते पारमार्थिकस्तु § पदत-दर्थबोधो निमित्तमात्रेणावतिष्ठते वर्णमालैव वाक्यार्थधीहेतुरिति । तद-प्यसांप्रतम् । कुतः ।

गौरवाद्विषयाभावात्तद्धेतोरेव भावतः ।
वाक्यार्थधियमाधत्ते स्मृतिस्था नाक्षरावली ॥

यदि हि वर्णमालैव स्मृतिसमारूढा वाक्यार्थमवबोधयेत्ततो ऽर्भक गामानयार्भक गां बधान शिशो गामानय शिशो गां बधान बालक गामानय बालक गां बधान डिम्भ गामानय डिम्भ गां बधानेत्यष्टानां ‖ वाक्यानामष्टौ शक्तयः कल्पनीयास्तवेति कल्पनागौरवम् । पदवादिनस्तु सप्तैव सप्तानां

* मनसः । अत एव न्यायसूत्रं युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति । गोतम-सू॰ अ॰ १ आ॰ १ सू॰ १६ ।

† प्रथमानुभवेन संस्कारोत्पादाद् द्वितीयादिज्ञानानां स्मृतित्वेन धारावाहिक-प्रत्यक्षानुपपत्तेरित्यर्थः ।

‡ न्यषेधीदिति ३ पु॰ पा॰ ।

§ वाक्यघटकसमर्थमात्रसकलवर्णमालाया एवान्यथानुपपत्त्या वाक्यार्थबोधे हेतुत्वं पदज्ञानपदार्थोपस्थित्योस्तु तत्र सहकारितामात्रमित्यर्थः ।

‖ अन्तानामिति ५ पु॰ पा॰ ।

पदानां शक्तयः कल्पनीया इति लाघवम् * । एवं शुक्लामित्यादिपदप्रक्षेपे पदं-वादिनो ऽष्टानां पदानामष्टौ शक्तयः कल्पनीया इति लाघवं तत्र सु षोडशानां वाक्यानां षोडशापराः शक्तयः कल्प्या इति महद्गौरवमापन्नम् । अपि चेयमक्षरमाला पदार्थावगमपूर्वकं वाक्यार्थविज्ञानं जनयेदतत्पूर्वा वा । न तावदतत्पूर्वा † संसृज्यमानपदार्थविषयविज्ञानाधीनो हि संसर्गः संसृज्यमानपदार्थनिरूपण ‡ मन्तरेण न शक्यनिरूपणः । तत्पूर्वं चेत्तथा हि § यथा यथा श्रूयन्ते पदानि तथा तथा पदार्था अपि प्रतीयन्ते । तदेताः पदतदर्थप्रतीतयो भावनानिचयद्वारेण स्वगोचरचारिणीमेकामेव स्मृतिधियमादधति तदारूढानि पदानि सपदार्थान्य ‖ दूरवर्तीनि वाक्यार्थबुद्धेरीशते इति तदप्यचतुरस्रम् । एवं च सत्यवश्याश्रयणीयेभ्यः पदार्थज्ञानेभ्य एव सिद्धेः कृतमनया वर्णमालया । तेषां च सामर्थ्यं निवेदयिष्यामः । अपि च । त्रिचतुरपञ्चषपदवाक्यवर्तिनी ¶ नानापदार्थप्रत्ययव्यवहिता क्रमेण वर्णमाला स्मर्यतापि तदभ्यधिकपदवति तु वाक्ये ऽसावतिदुःस्मरा । तस्मादिदमपि मत ** मविमृश्यमानसुन्दरमिति नाद्रियन्ते वृद्धाः ।

अस्तु तर्हि ।

पदान्याकाङ्क्षितासत्तियोग्यार्थान्तरसङ्गतान् ।
अर्थानभिदधन्तीह †† वाक्यं वाक्यार्थगोचरम् ‡‡ ॥

---

* लाघवमिति ३ पु॰ नास्ति ।

† अतत्पूर्वं वा । न तावदतत्पूर्वमिति ३ पु॰ पा॰ ।

‡ पदार्थावगममिति ३ पु॰ पा॰

§ यथा हीति २ पु॰ पा॰ ।

‖ अपदार्थानीति ३ पु॰ पा॰ ।

¶ वर्तिनीनां पदार्थेति २ पु॰ पा॰ । तदा पदव्यक्तीनामिति विशेष्यमध्याहार्यम् ।

** दर्शनमिति ३ पु॰ पा॰ ।

†† अभिदधन्ति पदानि वाक्यम् । वाक्यपदेन पदसमूह एव व्यवह्रियत इतिवत् ।

‡‡ वाक्यवाक्यार्थगोचरमिति २ पु॰ पा॰ ।

पदार्थमुख्य हि प्रधानमेकं गुणभूतार्थान्तरेण व्यतिषक्तं वाक्यार्थमाचक्षते वृद्धाः । तं च पदान्येवाकाङ्क्षायुपधानलब्धसुकरव्युत्पत्तीनि प्रत्याययितुमीशतइति कृतमप्रामाणिकानुपपद्यमानानवयववाक्यादिकल्पनाभिः । ननु ।

पदान्तरस्य वैयर्थ्यमश्रुतान्वयबोधने * ।
श्रुतान्विताभिधाने तु व्यक्तमन्योन्यसंश्रयम् ॥

अथापि स्यादनभिहितेनैवार्थान्तरेणान्वितमर्थमभिदधीत पदमभिहितेन वा । तत्रानभिहितस्वार्थान्तरा † न्वितस्वार्थाभिधाने ‡ पदादेकस्मादेवोच्चारितादृविवक्षितार्थप्रतीतेर्वैयर्थ्यमितरेषाम् । अभिहितान्विताभिधाने तु यावत्पचेदित्यनेनान्वितस्वार्थो नाभिधानीयस्तावत्तूखायामित्यनेनाधिकरणमुखा नाभिधीयते । एवमुखायामित्यनेनापि यावत्स्वार्थो नाभिधानीयस्तावत्पचेदित्यनेन स्वार्थो नाभिधीयतइति परस्पराश्रयप्रसङ्गः । पदार्थस्वरूपाभिधानपूर्वके तु तद्वदन्वितार्थाभिधाने द्विरभिधानमप्रामाणिकमनुपपद्यमानमापद्येत । न च पदजातं प्रथममर्थजातमनभिदधदेव यथास्वं स्वाभिधेयानि साहचर्यमात्रा § दर्थरूपाणि स्मारयति अथैतान्यर्थान्तरान्वितान्यभिधत्तइति सांप्रतम् । यतः ।

पूर्वानुभवयोनित्वात्स्मृतिस्तदनुसारिणी ।
सा चान्वितस्वरूपेण ततोऽपेक्षानपेक्षणा ‖ ॥

न खलु पदं पदार्थमात्रे क्वचिदपि दृष्टचरं ¶ येन तत्साहचर्येण तन्मात्रं स्मारयेत्तन्मात्रेण व्यवहारायोगात्तत्प्रयुक्तत्वाच्च तदुच्चारणस्य ।

---

* कल्पने इति ३ पु॰ पा॰ ।

† अनभिहितार्थान्तरेति ३ पु॰ पा॰ ।

‡ अनभिहितं स्वेनानुपस्थापितं यत् स्वार्थान्तरं स्वबोध्यत्वाभिमतमर्थान्तरं तदन्वितस्वार्थस्याभिधाने इत्यर्थः ।

§ साहचर्यादिति ३ पु॰ पा॰ ।

‖ सा चान्वितेन रूपेण ततोऽपेक्षाऽनपेक्षणामिति ३ पु॰ पा॰ ; अपेक्षमाणस्य आकाङ्क्ष्यमाणस्यार्थान्तरस्यानपेक्षणा जिज्ञासाऽभाव इत्यर्थः । तथैवोपपादयिष्यति

¶ दृष्टचरप्रयोगमिति ३ पु॰ पा॰ ।

अपि त्वन्वितस्वार्थे तथा च गामानयेत्यत्रानयनान्वितस्वार्थो गोशब्द-स्तेन सहोच्चरितो गां पश्येत्यत्रापि तदन्वितामेव गां स्मारयेत् तन्मा भू-त्तथा च तन्निराकाङ्क्षो गोशब्दः पश्येत्यनेन नान्वियात् । एवं प्रासादं पश्येत्यत्र प्रासादान्वितं पश्येति पदं तन्निराकाङ्क्षं न गवा सम्बध्येतेति सर्वत्र वाक्यार्थो * दत्तजलाञ्जलिः प्रसज्येत । न चाव्यभिचाराद्गामिति पदं स्वार्थमेव स्मारयति न तु पदार्थान्तरं व्यभिचारादिति सांप्रतम् । पदभ्यासादरप्रत्ययाहिता भावना प्रबोधवती स्मृतिहेतुः सङ्गीयते । तस्याश्च प्रबोधः प्रणिधानादिजन्मा ऽव्यभिचार एव नायतते † साहचर्य-मात्रमस्याप्यस्तीति ‡ पदार्थान्तरसहितमेव स्वार्थमनाकाङ्क्षं स्मारयेदिति हता बत वाक्यार्थधीस्तपस्विनीति पदानामर्थरूपमात्राभिधानमेषित-व्यम् । तथा च ते ते पदार्थाः क्रियादयः स्वसामर्थ्येन स्वरूपमात्रेण पदैरभिहिता विना कारणादिभिरपर्यवस्यन्तस्तदाकाङ्क्षायोग्यतासन्निधि-सहकारिणो वाक्यार्थधियमादधतीति युक्तम् । अत्रोच्यते ।

विधान्तरानुपगमात्स्मृतिलक्षणयोगतः ।
अभ्यासातिशयाद्रूपस्मृतेर्नान्योन्यसंश्रयम् ॥

इदं तावन्निरूपयतु भवान् प्रमाणसंशयविपर्ययस्मृतिषु कतमेयं पदात्पदार्थप्रतिपत्तिरिति । तत्र न तावत्प्रमाणमनधिगतार्थबोधनं तदुपे-यते । यथा ऽऽहुः । सर्वस्यानुपलब्धे ऽर्थे प्रामाण्यं स्मृतिरन्यथेति § । न च पदात्पदार्थधीरनधिगतार्थगोचरा । न खलु सम्बन्धसंवेदनसमये सम-धिगतो ऽर्थः पदैरभिधीयमानो देशकालावस्थाविशेषेणाप्यतिरिच्यते । अन-तिरिच्यमानश्च न स्वरूपे विज्ञानं प्रमाणयति । अत एवाहुः ।

---

* वाक्यार्थप्रत्यय इति ३ पु॰ पा॰ ।

† अव्यभिचारे सत्येव स्मृतिजनक इति नियमो नास्तीत्यर्थः ।

‡ साहचर्यमात्रस्यापि च संबन्धतया प्रणिधानादिगणे पाठादुपपत्तेश्च तदु-द्बोधहेतुभावो न विरुध्यते । तत्र स्वार्थस्येव पदार्थान्तरस्याप्यस्तीति ३ पु॰ अधिकः पाठः ।

§ श्लोकवार्तिके वृत्तिकारग्रन्थे श्लो॰ ११ ।

परोक्षश्चानुभूतश्च यस्तत्र स्मृतिरिष्यते ।
प्रमिते ऽनुप्रयुक्तत्वा * त्स्मृतेर्नास्ति प्रमाणता † ॥

पदमभ्यधिकाभावात्स्मारकान्न विशिष्यते इति च ‡ । न हि पदस्य प्रणिधानादिभ्यः संस्कारोद्बोधहेतुभ्यः कश्चिद्विशेषः । संशयविपर्ययहेतुभावस्तु पदस्येति स्ववीयः । न च पञ्चमी विधा समस्तीति स्मृतिः परिशिष्यते । सा चान्वितगोचरा न स्वरूपगोचरेति तुल्यो दोषः । अभिधानतः स्मारितं वाक्यार्थान्वयि न साहचर्यादिति चेत्कुतस्तर्हि गङ्गायां घोषः प्रतिवसतीत्यादौ तीरादीनामनभिधेयानां प्रतिवासान्वयः । अपि चाभिधानतः स्मारितस्वरूपमात्रस्य साहचर्यस्मारितेनैवार्थान्तरेणाकाङ्क्षोपरतेरनाकाङ्क्षस्य च चरमप्रतीतेर्नाभिधानतो § ऽर्थान्तरेण संगमायोगात्समुत्पन्नसंकटो वाक्यार्थः प्रसज्येतेति कुतस्तद्भावना कुतस्तरां तदुद्बोधः पदैः कुतस्तमां च तदन्वयस्मरणमित्यकामेनापि अन्वयिस्मरण ‖ मभ्युपेयम् । इतश्चैतदेवं यदभ्यासातिशयः संस्कारातिशयमाधत्ते स च द्रागित्येव प्रबुद्ध एकपदे स्फुटतरं स्मरणमुपजनयति । दर्शनमात्रजन्मा ¶ पुनर्मन्दो विप्रलम्बितप्रबोधो मन्दमेव कार्यमाधातुमुत्सहते । अभ्यासवती च पदस्य स्वार्थेन साहचर्यानुभूतिर्यथा न तथा ऽर्थान्तरेण ; अन्वये ऽभ्यासवत्यप्यर्थान्तरेष्वनभ्यासात्तद्रूपणा ** च्चान्वयस्यानभ्यास एव । तथा च स्मृतिसन्निहितस्वरूपमात्रेणार्था अर्थान्तराकाङ्क्षाः पदैरन्विता अभिधीयन्त इति न परस्पराश्रयम् । नाप्यनाकाङ्क्षता । आकाङ्क्षा च प्रतिपत्तुर्जिज्ञासा । सा च क्व चिदभिधानापर्यवसानाद्भवति यथा द्वारा इति । न ह्यत्र प्रकृत्यर्थादतिरिक्ते प्रत्ययार्थे प्रतीतिरस्ति येनान्वितः प्रकृत्या

---

* तु प्रयुक्तत्वादिति ३ पु॰ पा॰ ।
† श्लोकवार्तिके शब्दवादे श्लो॰ १० २ ।
‡ श्लोकवार्तिकशब्दवादश्लो १० ५ ।
§ पदान्तरसमभिव्याहारोत्तरमुद्बुद्धया ऽभिधया पश्चादुपस्थितेनेत्यर्थः ।
‖ अन्वितस्मरणमिति ३ पु॰ पा॰ ।
¶ तत्साहितार्थान्तरसाहचर्यदर्शनजन्य इत्यर्थः । स्वार्थेन संगतिग्रहो भूयार्थान्तरेण तु प्रयोगभेदेनानियतत्वाच्च तथेति भावः ।
** तद्रूपनिरूपणात्वादिति ३ पु॰ पा॰ ।

स्वार्थो ऽभिधीयेत प्रातिपदिकार्थमात्रे प्रथमोत्पत्तेः*। तदन्विताभिधानपर्यवसानाय प्रतिपन्ना पदार्थान्तरं स्मारितान्वययोग्यं जिज्ञासते। क्वचिच्चाभिहितार्थापर्यवसानात् यथा विश्वजिता यजेतेति। इह हि कार्यस्य† विषयकरणान्वितस्याभिधानं पर्यवसितं न पर्यवस्यत्यभिहितं कार्यं नियोज्यभेदमन्तरेण। न खलु कार्यमनुष्ठानं विना व्यवतिष्ठते। न चाकर्तृकं तत्। न चानधिकृतः कर्त्ता। न चानियोज्यो ऽधिकृत इत्यानुपूर्व्या‡ सिद्धं तेनात्रापि तत्पर्यवसानायास्ति तदन्वययोग्ये नियोज्ये जिज्ञासा। §न चानन्वितस्वार्थस्मरणमात्रावसितव्यापारेषु पदेषु तदर्था एवाकाङ्क्षादिसहकारिणः करिष्यन्ति वाक्यार्थधियमिति कृतमत्र पदानां सामर्थ्येनेति सांप्रतम्। पदानभिहितानां|| तेषां मानान्तरगोचराणां वाक्यार्थधीहेतुभावादर्शनात्¶। श्वेतमध्यक्षं पश्यतो ह्रेषारवं च शृण्वतः खुरनिष्पेषशब्दं च श्वेतो ऽश्वो धावतीत्यन्वयधियः पदश्रवणमन्तरेणोत्पादो दृष्ट इति चेद् नानुमानादर्थापत्तेर्वा तदवगमात्। अनवगमवद्वा**। एवं वादी हि ताक्त्प्रष्टव्यो†† व्याचष्टां किं श्वित्वेतसमानाधिकरणो येन ह्रेषाध्वनिखुरनिष्पेषशब्दाववमितौ तस्य ज्ञानं निरूप्यते आहो स्विद्धेन मितिमा च पदनिष्पेषशब्दो ह्रेषाध्वनिश्च स्वरूपमात्रेणावमितः। तत्र पूर्वस्मिन् कल्पे लिङ्गसामर्थ्यजमेतच्च पदार्थसामर्थ्यजम्। उत्तरस्मिन्नपि द्रव्यान्तराभावनिश्चये सत्यर्थापत्तिस्तदभावे च नावगम एव। अपि च

* प्रत्ययोत्पत्तेरिति ३ पु· पा·।

† कार्यस्येति ३ पु· नास्ति।

‡ क्रियायाः सकर्तृकत्वनियमादिष्टसाधनताज्ञानं विना कर्तृत्वानुपपत्तेरनुष्ठानमन्तरेण फलासंभवात्स्वर्गकामः कर्तृत्वेनान्वेतीति भावः।

§ विश्वजिता यजेतेति वाक्ये ऽश्रुतमपि स्वर्गकाममन्वितमालोच्य सर्वत्र तथैवास्त्वित्याशङ्कते।

|| पदानभिहितानामिति ३ पु· पा·।

¶ तथा च तत्र पदाध्याहार इति भावः। अन्यत्रापि क्व चित्परिवश पिनद्धेमित्यादावध्याहारस्थले इष्टापत्तिः।

** व्याप्तिज्ञानाद्यभावे इति शेषः। तुल्यत्वे ऽपि तस्याः शाब्दत्वाभावाच्चेत्यपि वक्ष्यति।

†† पृष्ट इति ३ पु· पा·।

पदार्थसामर्थ्यञ्चाभ्युपगमे शब्दमूलत्वाभावेनाशाब्दत्वान्मनसश्च बाह्यानपेक्षस्याप्रवृत्तेः षट्प्रमाणीव्यतिरिच्यमानसहकारिसापेक्षत्वे सप्तमप्रमाणाभ्युपगमप्रसङ्गः * । तत्सिद्धमेतन्नानभिहिता अर्था वाक्यार्थधीहेतव इति पदैरभिहितानामयं महिमा ऽभ्युपेतव्यस्तेषाम् । तथा च पदार्थानां वाक्यार्थप्रत्ययाधानसामर्थ्यं पदानां च तत्सामर्थ्याधानसामर्थ्यमिति शक्तिद्वयं कल्पनीयम् । अन्विताभिधानवादिनस्तु प्रथमावगतानां पदानामभिधायकानां वाक्यार्थप्रत्ययोपजननपर्यवसिततात्पर्यवृत्तीनामेकमेवाकाङ्क्षायोग्यतासत्तिरूपोपाध्युपायगृहीतार्थान्तरान्वितस्वार्थाभिधानसामर्थ्यमिति लाघवादतो ऽर्थाभिधायिनां पदानामेव वाक्यार्थधीहेतुभाव इति चतुरस्रम् ।

अत्राभिधीयते । एष तावदौत्सर्गिको न्यायो यदसति बलवद्बाधकोपनिपाते ।

सहकारिणि कार्ये च प्रत्यासन्नं हि कारणम् ।
सति तद्भावभावित्वे तथा चार्थस्मृतिः पदात् ॥

भवति हि कुतश्चिन्मानसापराधाद्विदितपदार्थो विदितपदरूपमात्रश्चेतनो न मनागपि वाक्यार्थमवगच्छति अवगच्छति तु समभिव्याहृतपदकदम्बकोपजनितस्वार्थस्मृत्यनन्तरम् । तद् अमूषामेव स्वार्थस्मृतीनामाकाङ्क्षायोग्यतासत्तिसहकारिणीनां कारणत्वं वाक्यार्थप्रत्ययं प्रत्यध्यवसामः । यदपि मतं स्वार्थस्वरूपस्मृतयो ऽपि हि वस्तुतदर्थान्तर †-सङ्गतार्थगोचरा ‡ न स्वगोचरमर्थान्तरेण घटयन्ति विभ्रमप्रसङ्गात् । न खलु प्रासादमात्रस्य स्मरतो ऽस्मरतश्च तादृशपाटलिपुत्रं स्वरूपमात्रस्मृतयो माहिष्मत्यैनं घटयितुमीशते ईशाना वा भवन्त्यभ्रान्ताः । तद-

* अर्थसहकारिकारणकमनसो ऽर्थस्य वा केवलस्य प्रमितिजनकताया अक्लृप्तत्वादिति भावः ।

† वस्तुतस्तदर्थान्तरेति ३ पु॰ पा॰ ।

‡ वस्तुभूतेन तता ऽर्थान्तरेण संगतो ऽर्थो गोचरो यासां तादृश्यः स्मृतय इत्यर्थः ।

प्यसांप्रतम् । मा नाम भूदीदृशं स्मरणफलसंस्कारस्य सामर्थ्यं यदनुभूतानि-नुभूतस्वरूपतदर्थान्तरसम्बद्धद्वयविषयमाधत्ते स्मरणं समीचीन*मिति। सम्भवति तु समभिव्याहृतपदावलीलब्धजन्मनामर्थस्वरूपस्मृतीनामाकाङ्क्षादिरूपसहकारिभेदोपधानाहितदशान्तरोपपादितप्रमाणभावाना†मनन्तरपरिदृश्यमानमानान्तरानधिगतस्वार्थपरस्परसम्बन्धनिर्भासप्रकाशफलानाम् । अन्यथा प्रत्यभिज्ञानमपि न जायेत । तत्रापि देशकालोपहित‡स्वरूपसंवेदनजन्मा संस्कारस्तदाहिता वा स्मृतिः कथं स्वार्थं देशान्तरेण वा कालान्तरेण वा घटयेत् । तत्र हीन्द्रियादिसहकारिसमवधानप्राप्तदशान्तरयोरेतयोः पूर्वापरदेशकालानुगतैकवस्तुगोचरप्रत्यभिज्ञानस्य प्रसवसहः§ को ऽपि महिमा तादृगभ्युपगन्तव्यः । स चेहापि समानो ऽन्यत्राभिनिवेशात् । न च देशकालावस्थानानात्वे वस्तुनो रूपं नानेत्युपपादितं न्यायकणिकायाम् । ननूक्तं न मानान्तरतो ऽनुभूतस्मृतानामर्थरूपाणां‖ वाक्यार्थधीप्रसवसामर्थ्यमुपलब्धमुपलम्भे वा सप्तमप्रमाणाभ्युपगमप्रसङ्गः¶ । आगमस्य चात्रैवान्तर्भावे प्रत्यक्षादिभिस्तुल्यकक्षतया तदेवोपन्यसनीयं न त्वागमस्तद्भेदः** । न हि लोका ब्राह्मणयुधिष्ठिराविति प्रयुञ्जते प्रयुञ्जते तु ब्राह्मणराजन्याविति वसिष्ठयुधिष्ठिराविति वा । न च भेदान्तरोपन्यासेन भेदान्तरमुपन्यस्तं भवति । तदयं समस्तमानलक्षणप्रवृत्तो

---

* संस्कारस्य स्वगोचरागोचरविषयकस्मृतिजनकत्वाभावे ऽपि स्मृतेर्यद्द्वयमाणानुपपत्त्या तादृशधर्मिस्मृतिजनकत्वमङ्गीक्रियतइति यावत् । सामर्थ्यं कर्तृ समीचीनमबाधितं स्मरणं कर्म । आधत्ते जनयतीत्यर्थः ।

† दशान्तरापादितप्रमाणभावानामिति ३ पु॰ पा॰ ।

‡ देशकालभेदोपहितेति ३ पु॰ पा॰ ।

§ प्रत्यभिज्ञानप्रसवसह इति ३ पु॰ समस्तः पाठः ।

‖ ननूक्तं च मानान्तरते ऽनुभूतस्मृतमर्थरूपाणामिति २ पु॰ पा॰ ।

¶ प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिव्यतिरिक्तस्यार्थस्वरूपस्यापि प्रमाणताऽऽपत्तिरित्यर्थः ।

** अर्थस्वरूपस्मारकत्वादागमस्यार्थस्येव प्रमितिजनकत्वात् पूर्वोदाहृते भवतिरचान्नुपप्रत्यक्षखुर्निष्पन्नमावणप्रत्यक्षदशायामश्वा धावतीति धियोऽर्थमात्रप्रभवत्वस्वीकारे आगमस्य क्व चिदर्थस्मृतावुपयोगे ऽपि तस्याव्यापकत्वादिति भावः ।

मानतुषस्यापि परित्यागे तेनैव सह स्वकौशलमपि परित्यजेदिति पदाहितानुभवानां वा* पदाहितस्मृतिरूपाणां वा ऽयमीदृशः† सामर्थ्यातिशयो यतो ऽन्वयधिय उदय इत्यकामेनाप्यभ्युपेयम् । तथा च तिस्रः शक्तयः कल्प्येरन् वा पदानां हि तावदर्थरूपानुभवजननशक्तिः अर्थरूपाणामन्योन्यान्वयप्रत्यायनशक्तिः तदाधानशक्तिश्चापरा पदानामेवेति । स्मारकत्वपक्षे तूक्तं शक्तिद्वयम् । अन्विताभिधाने तु पदानामेकैव शक्तिः तत्कल्पनालाघवादेतदेव न्याय्यमिति । अत्रोच्यते । सत्यम् ।

कल्पनालाघवं यत्र तं पक्षं रोचयामहे ।
तदेव कतरत्रेति निपुणं संप्रधार्यताम् ॥

एकैव किल शक्तिरन्विताभिधानवादिभिरन्वितस्वार्थगोचरा ऽभिप्रेयते पदानां न तु विशेषे‡ तदप्यभिधीयते§ । सेयं न तावदन्वयमात्रविषया । तन्मात्रविषयत्वे तस्याविशेषात्सर्वशब्दानां पर्यायताप्रसङ्गः । नापि व्यतिषक्ताभिधायि पदं न व्यतिषङ्गस्य वाचकं जात्यभिधायकमिव व्यक्तेः व्यतिषक्ततो ऽवगतेर्व्यतिषङ्गस्य व्यतिषक्तानां च स्वरूपतो भेदान्नैकार्थ्यं पदानामिति सांप्रतम् । व्यतिषक्त इति स्वरूपमात्रं वोपलक्ष्येत व्यतिषङ्गवद्वोच्येत । तत्र रूपाभिधानजन्मा ख्यातिः|| जात्यभिधानजन्मेव व्यक्तिं न व्यतिषङ्गमपि गोचरयितुमर्हति । न हि यथा ऽऽकारिणमन्तरेणाकारो ऽशक्यनिरूपण इति शब्दसामर्थ्यगोचरत्वमनापन्नो ऽप्याकार्याकाराभिधायिशब्दजनितविज्ञानविषयभावं नातिपतति¶ तथा ऽर्थस्वरूपमन्वयमन्तरेण दुरधिगमं येन स्वगोचरशब्दसामर्थ्यजन्मनि

* बौद्धपदार्थानामेव शाब्दधीविषयतापत्तेः ।

† पदाभिहितानुभवानामिति यदृदीदृश इति च २ पु॰ पा॰ ।

‡ अन्विते न तु विशिष्टइति ३ पु॰ पा॰ ।

§ स्ववाच्यप्रतियोगिताऽनुयोगिताकत्वविशिष्टे तत्त्वेन तात्पर्यविषये वा न तु सम्बन्धत्वव्याप्यतत्तद्रूपावच्छिन्ने नानार्थत्वप्रसङ्गात् ।

|| स्वरूपमात्रनिरूपितशक्तिज्ञानमित्यर्थः ।

¶ शुक्लादिशब्दगतशक्त्यविषयो ऽप्याकारी गुणाश्रयो गुणमात्रवाचकपदजन्यबोधविषयतां न मुञ्चतीत्यर्थः । आकारीति पृथक् पदम् ।

विज्ञाने ऽन्वयमपि समर्पयेत् । तद्रूपस्यान्वयमन्तरेणाधिगन्तुमशक्यनिरूपणत्वात् । नान्वयं विना तद्रूपं क्वचिदपीति चेत् । तत्किं लिङ्गमपि न लिङ्गिनं विनेति तदपि तद्विरूपणाधीननिरूपणमस्तु तथा न लिङ्गत्वमपीति अनुमानमुत्पन्नसङ्कटमापद्येत* । तस्मादन्वितं शब्दसामर्थ्यगोचर इत्यभ्युपगच्छता ऽर्थस्वरूपं च तदन्वयश्च तद्विषयतया ऽभ्युपगतो भवतः । तदिह यदि पदसामर्थ्यस्य स्वरूपमात्रगोचरतया ऽन्वयधिय उदयमुपपादयितुं शक्ष्यामः ततस्तावतैव परितोक्ष्यामः । तदन्वयविषयत्वकल्पनाच्च विरंस्यामो लाघवाय । अथ तु सहस्रेणाप्यनुसरणप्रकारेण प्रयत्नानामर्थस्वरूपमात्रोपतीर्णवृत्तीनि पदसामर्थ्यं वाक्यार्थबुद्ध्युदयासंभवः ततः परावृत्य शब्दसामर्थ्यस्यैवोभयविषयत्वं कल्पयिष्यामः । किं तावत्प्राप्तम् ।

वाच्यरूपाविनाभूतव्यतिषक्तदशापराः ।
समभिव्याहृतेः शब्दा भवन्त्यनुपपत्तितः ॥

सामर्थ्याधिगमो हि भावानां न मानान्तराधीनजन्मा किं तु कार्यात्पत्त्यन्यथाऽनुपपत्तावायतते । तदियमपि व्यतिषङ्गप्रतीतिः कथमपि दृष्टादृष्टप्रकारभेदसहायादुपपद्यमानोत्पत्तिर्न पदसामर्थ्यमात्मनि प्रमाणयितुमर्हति । अनन्यलभ्यः शब्दार्थ इति हि त्रैविद्यवृद्धाः । अत एवाख्यातादौ कर्त्राद्यभिधायितां नाद्रियन्ते । लभ्यते च समभिव्याहारान्यथानुपपत्त्या पदानामन्वितार्थपराणां स्वाभिधेयार्थरूपसमवेतान्वितावस्थाप्रत्यायनं लक्षणया । न हि पदान्यसमभिव्याहृतानि स्वाभिधेयप्रत्ययमात्रेण पर्यवसातुमीशते । न हि लौकिकाः पदार्थमात्रप्रत्यायनाय प्रवर्तन्ते । प्रतिपित्सितं खल्वेतदिति प्रतिपादयिष्यन्तः पदान्युच्चारयन्ति । अबुभुत्सितावबोधने त्वनवधेयवचनतया नामी लौकिका नापि परीक्षका इत्युन्मत्तवदुपेक्ष्येरन् । न च भूयो भूयः समधिगतं परं पदार्थमात्रं बुभुत्सन्ते । तदनधिगतमर्थमवगमयितुमनसः समभिव्याहरन्ति वृद्धाः पदा-

* लिङ्गस्य लिङ्गत्वस्य वा व्याप्यकाधीननिरूपणत्वेन तज्ज्ञानकालीनव्यापक-ज्ञानाभ्युपगमे पक्षधर्मताज्ञानोत्तरजायमानप्रमितिविषयताऽनुपपत्तेरिति भावः ।

नि । तदयं समभिव्याहारः पदानामनधिगतार्थप्रत्यायनप्रयुक्तस्तदन्तरेणानुपपद्यमानः स्वाभिधेयसमवेतामनधिगतचरीमन्वितावस्थां लक्षयति । तदुक्तम् । विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिर्जनइति । तदेवमनुपपद्यमानसमभिव्याहारपदजातजातस्मरणस्वार्थप्रत्यासत्त्या* दृश्यमानया दृश्यमानार्थगताकाङ्क्षायोग्यतासंनिधिसध्रीचीनया लक्ष्यमाणा ऽन्वितावस्था नात्मनि पदसामर्थ्यं प्रमाणयति अन्यलभ्यत्वात्† ।

स्यादेतत् । अस्तु लौकिकानां पदसंघातानां प्रेक्षावत्पुरुषसंदृब्धानां संदर्भितुरभिप्रायमनुरुध्यमानानामनुपपत्त्या ऽनधिगतार्थलक्षणापरत्वं वैदिकानां तु पुरुषासंदृब्धानामबुद्धिपूर्वाणां नानुपपत्तिर्यया‡ ऽन्वितावस्थां लक्षयेयुः । यएव लौकिकाः शब्दास्तएव वैदिका अपीति चेत्तत्किं गङ्गायां घोष इति गङ्गाशब्दो लाक्षणिक इति गङ्गायां पयांसि यादांसि गङ्गायामित्यत्रापि स एव लाक्षणिको ऽस्तु । अनुपपत्तिविरहान्नेदमिति चेत्समानमेतदबुद्धिपूर्वकेषु वैदिकेष्वपि । §अथ परस्यापि वैदिकेषु पदसंदर्भेषु कुतो ऽनधिगतार्थबोधनम् । अर्थान्तरान्वितस्वार्थे पदसामर्थ्यावगमाल्लोके वैदिकानां च लौकिकेभ्यो ऽनन्यत्वादिति चेत्तन्न । लौकिकपदानि हि पुरुषाधीनरचनया तदभिप्रायानुरोधेनान्वितार्थपरतया तमवगमयितुमीशते इति किमर्थान्तरान्वितस्वार्थाभिधानकल्पनया|| । तथा सति वैदिकार्थप्रतीतिरनुपपन्नेति चेद् मोपपादि किं नश्छिन्नं नैयायिकानाम् । मानानुसारि हि प्रयोजनं न तु तदनुसारि मानम् । तस्मात्स्वदृष्टिपक्षपातं परित्यज्यास्थायास्तिकपथमृजुमनुसरावो निमित्तमप्रत्यूहमस्या वैदिकार्थप्रतीतेः । तत्रानादिवृद्धव्यवहारपरंपरायं

---

* अनुपपद्यमानः संसृष्टतात्पर्यकत्वाभावे ऽनुपपन्नः पदान्तरसमभिव्याहारो यस्य तादृशेन पदजातेन पदसमूहेन जातं स्मरणं यस्य तादृशस्यार्थस्य प्रत्यासत्त्या संबन्धेनेत्यर्थः ।

† अनन्यलभ्यत्वादिति २ पु· पाठः ।

‡ तात्पर्यानुपपत्त्येत्यर्थः ।

§ अन्विताभिधानवादं दूषयति । अथेति । लोके ऽर्थान्तरान्वितस्वार्थे पदानां सामर्थ्यग्रहादगृहीतसङ्गतिकस्य स्वर्गापूर्वादेर्वैदिकबोधविषयत्वासंभवादिति भावः ।

|| पदैरर्थस्वरूपमात्रोपस्थितौ वक्तृतात्पर्यज्ञानवशात्तत्संसर्गबोध इति भावः ।

पदतदर्थसंबन्धबोधोपाये सत्यसत्यपि संबन्धरि शब्दादर्थप्रतीतेरुपपत्तेर-
र्थभेदनिरूपणस्य च ज्ञानभेदनिबन्धनत्वाज्ज्ञानभेदस्यार्थाभेदात्तदनभि-
धाने ऽभिधानाभावादर्थभेदाभिधाने वा तत एव सिद्धेस्तदभिधानानुप-
पत्तेस्तद्धेतुतया तु तत्कल्पने ताल्वादिव्यापारस्यापि वाच्यत्वप्रसङ्गात्स्वा-
भाविकः शब्दार्थयोः संबन्ध इति स्थितिः*। स† तु किमर्थान्तरान्वितस्या-
र्थस्यार्थरूपमात्रस्य वा। यद्यपि रूपमात्रमुच्यते पदैस्तदा ऽपि किं‡ तन्मा-
त्रपरैराहो स्विदन्वितावस्थाप्रत्यायनपरैः§। तत्र रूपमात्रप्रत्यायनपरत्वे
पदानां वाक्यार्थप्रत्ययानुपपत्तेरप्रयोजनस्य प्रयोजनासंभवाऽदत्यन्तान्धमूकं
जगत्प्रसज्येत। तदुभयं|| परिशिष्यते लौकिकपदसंदर्भस्य विशिष्टार्थप्रत्या-
यनप्रयोजनपरस्य। तत्रार्थान्तरान्वयपरस्य स्वार्थमात्राभिधाने ऽप्यन्वित-
प्रतिपत्तेरुपपत्तेरर्थापत्तिपरीक्षया ऽत्रान्वयं यावत्पदस्य सामर्थ्यमनुवर्तनी-
यम्¶। तथा हि। वृद्धप्रयुक्तवाक्यश्रवणसमनन्तरं प्रवृत्तिनिवृत्तिहर्षशोकभय-

* वृद्धव्यवहारपरंपरारूपे शब्दार्थसंबन्धज्ञानकारणे सति अनेन शब्देनायं बोध्य इत्युपदेष्टर्यसत्यपि बोधदर्शनात्तत्तदर्थगतभेदप्रतिपादनस्य तत्तद्विषयकज्ञानाकारभेदप्रयुक्तत्वाज्ज्ञानगतवैलक्षण्यस्य विषयतासम्बन्धेन तत्तदर्थरूपतया ऽर्थाभेदाद् ज्ञानगतवैलक्षण्यस्य वस्तुतः सत्त्वे ऽपि तस्य बोधविषयत्वाभावेन पदेषु तत्तज्ज्ञानगतवैलक्षण्यनिरूपितशक्तेर्वक्तुमशक्यतया ऽर्थानामिव तत्तदर्थगतवैलक्षण्यस्यापि वाच्यत्वाङ्गीकारे तावन्मात्रेण शक्त्यैवेतरव्यावृत्ततत्तदर्थविषयकशाब्दधिय उपपादयितुं शक्यतया ऽन्वयांशे पदशक्यताभ्युपगमवैयर्थ्यादर्थगतवैलक्षण्यबोधस्य स्वान्वयप्रयोज्यत्वमात्रेण स्वरूपतो ऽर्थाभेदात्तद्वैलक्षण्यनिर्वाहकान्वयांशस्यापि वाच्यत्वाभ्युपगमे भिन्नाभिन्नार्थबोधकारणीभूतपदप्रत्यक्षकारणपदोच्चारणानुकूलप्रविष्टताल्वादिव्यापारस्यापि परंपरयेतरव्यावृत्तार्थबोधं प्रत्युपयोगित्वेनानिष्टस्य वाच्यत्वस्यापत्तेः शब्दार्थसंबन्धः स्वाभाविक एवेति सिद्धान्त इत्यर्थः।

† सम्बन्धः।

‡ किमिति २ पु॰ नास्ति।

§ स्वरूपमात्रतात्पर्यकैः पदैस्तात्पर्यविषयस्य संसर्गस्य बोधनोपत्त्यसंभवादित्यर्थः।

|| उभयम्। अर्थान्तरान्वितस्वार्थाभिधायकत्वमन्वितावस्थाप्रत्यायनतात्पर्यकत्वं च।

¶ स्वार्थमात्रनिरूपितशक्तिस्वीकारे ऽपि पदसमूहस्य विशिष्टार्थबोधतात्पर्यकत्वे ऽन्वयप्रतीतेः पदविशेष्यकतात्पर्यज्ञानेनैवोपपत्तेः यजेत स्वर्गकाम इत्यादावपूर्वे ऽर्थापत्तिलभ्ये पदानामशक्यार्थान्तर इवान्वयांशे ऽपि सामर्थ्यमङ्गीकार्यमित्यर्थः

संप्रतिपत्तेर्व्युत्पन्नस्य व्युत्पित्सुस्तद्धेतुप्रत्ययमनुमिमीते तस्य सत्स्वप्यन्येष्व-नुपजातस्य पदजातश्रवणसमनन्तरं संभवतस्तद्धेतुभाव*मवधारयति। न चैष प्रत्ययः पदार्थमात्रगोचरः प्रवृत्त्यादिभ्यः कल्प्यते†इति विशिष्टार्थगोचरो ऽभ्युपेयते तद्विशिष्टार्थपरता ऽवसिता वृद्धव्यवहारे पदानाम् । न चेयम-विशिष्टार्थस्मरणमन्तरेणेत्यविशिष्टार्थस्मारकत्वं‡ तदुत्पत्त्यैव प्रत्युप्तम्§। न चैतदेषां विशिष्टार्थतामुपहन्तुमर्हति । न जातु भावाः स्वनिमित्तमुप-घ्नन्ति सोपघानिषत स्वमपीति । न चैतावता विशिष्टाभिधानमविशि-ष्टविषयेभ्यो ऽपि तत्परेभ्यस्तदुपपद्यते॥ । तस्माल्लोकानुसारेण वैदिक-स्यापि पदसंदर्भस्य विशिष्टार्थप्रत्ययप्रयुक्तस्याविशिष्टार्थाभिधानमात्रेण लक्षणया¶ विशिष्टार्थगमकत्वम् । स्वार्थमात्रपरत्वे तु प्रयोजनाभावेन तस्याप्यनुपपत्तेः** । यथाहुरत्रभवन्तो वार्तिककारमिश्राः†† ।

---

* तत्कारणकत्वं वाक्यकारणकत्वमिति यावत् ।

† प्रवृत्त्यादीनां पदार्थमात्रप्रतीत्या ऽनुपपत्तेः प्रवृत्त्यादय एव विशिष्टार्थप्रतीत्य-नुमापका इति भावः ।

‡ विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकविशेष्यतावच्छेदकधर्मप्रकारकनिश्चयस्य च हेतुत्वात् ।

§ विशिष्टविषयकबोधोत्पत्त्यैव पदानामविशिष्टार्थस्मारकत्वमाक्षिप्तमित्यर्थः ।

॥ असंसृष्टस्वार्थमात्रनिरूपिताभिधाख्यवृत्तिर्विशिष्टेभ्यः पदेभ्यो विशिष्टार्थ-तात्पर्यकेभ्यस्तात्पर्येणैव संसृष्टार्थप्रतीत्युपपत्तेः संसृष्टनिरूपिता ऽभिधा न स्वीक्रियत-इत्यर्थः ।

¶ लोके वक्त्रभिप्रायरूपतात्पर्यसंभवे ऽप्यपौरुषेयेषु वैदिकवाक्येषु तदसंभवात्त-त्तया पदार्थमात्रोपस्थितावपि लक्षणया संसृष्टार्थबोधजनकत्वमित्यर्थः ।

** तदन्यप्रतीतीच्छया ऽनुच्चरितत्वे सति तत्प्रतीतिजननयोग्यत्वरूपेण तात्प-र्येण युक्तस्य वैदिकपदजातस्य स्वार्थमात्रे प्रदर्शिततात्पर्यस्वीकारे प्रयोजनभूतस्य प्रवृ-त्त्यादेः स्वरूपमात्रज्ञानेनासम्भवात् प्राक् प्रदर्शितरीत्या ऽनुमितिकारणीभूतप्रवृत्त्याद्यभा-वेन स्वार्थमात्रबोधस्याप्यनुपपत्तेरिति भावः । एवं च स्वरूपमात्राभिधानेन प्रयोजनशू-न्येषु वैदिकपदेषु लक्षणा ऽऽश्रयणेन संसृष्टबोधाङ्गीकारे ऽपि निर्विशेषात्मतत्त्वबोधनेन निखिलप्रपञ्चबाधरूपपरमप्रयोजनसंपादकेषु महावाक्येषु तत्त्वमस्यादिषु नान्वयांशे लक्षणेति भावः । अत्र भूमिका ऽनुसंधेया ।

†† श्लोकवार्तिके वाक्याधिकरणे श्लो॰ ३३६ ।

साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् ।
वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले ॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्* ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥

तथा च वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थितिरिति । †अन्विते ऽर्थे तात्पर्याभ्युपगमात्तदभिधायित्वं पदानामिति चेत्तत्किं गङ्गायां घोष इत्यत्र गङ्गापदं तीराभिधायि भवेत् तत्र तात्पर्यात्‡स्मारितस्वार्थप्रत्यासत्त्या ऽपि तदवगतेर्न तत्परस्यापि तदभिधानमिति यद्युच्येत तदितरत्रापि समानमुक्तेन क्रमेण§ तस्मादनेकान्तं तात्पर्यं न बीजं सामर्थ्यसाधने|| । न जातु ज्वलन्ति काष्ठानि पाकपराण्यपि¶ पाके साक्षात्समर्थानि किं तु ज्वलनएव तया द्वारा तत्सिद्धेः । तेषामतुल्यकक्षाणां प्राथम्यं न विशेषायोपयुज्यते येन पदानां तदर्थेभ्यः प्राथम्येनान्वितार्थधियं प्रति सामर्थ्यं कल्प्येत** । दर्शिता त्वतुल्यकल्पना रूपमात्राभिधानादन्विताभिधाने गौरवात् । न च पदार्थानामुपलभ्यमानाकाङ्क्षादिसहकारिणां विशिष्टार्थधीजन्मनि सामर्थ्यमपरं कल्पनीयं†† तेभ्य एव‡‡ तादृशेभ्यस्तदुत्पत्तेरुपपत्तेः । न चैते मानान्तरदृष्टा अर्था न विशिष्टार्थबुद्धे§§-

* प्रवृत्ताविति फले निमित्ते सप्तमी । प्रवृत्त्यर्थमाश्रितवाक्यार्थबोधार्थम् । नान्तरीयकं प्रदर्शितदिशा ऽऽवश्यकम् ।

† शक्यविषयस्यापि तात्पर्यविषयत्वमात्रेण बाधाभ्युपगमे ऽतिप्रसङ्गं मन्यमानः शङ्कते ।

‡ स । अभिधायकत्वं तस्येष्टमिति शेषः ।

§ लक्षणयापि विशिष्टधीसंभवादिति भावः ।

|| शक्तिसाधने ।

¶ पाकसंपादकान्यपि । पाकेच्छयोपात्तान्यपीति यावत् ।

** अन्यथा ऽप्युपपद्यमानानां विशिष्टज्ञानानां प्रवृत्त्यादिहेतुकानुमितिप्राथमिकविषयत्वं शक्त्यनुमापने न पर्याप्तमित्यर्थः ।

†† प्रत्यक्षादिना ऽवगतानां श्वेत्यखुरनिष्पेषशब्दश्रवणादीनां विशिष्टार्थबोधजनकत्वस्य प्रागुपपादितत्वात्तथैव पदैरुपस्थितानामप्यर्थानां विशिष्टानुभवजनकत्वाभ्युपगमे कारणान्तरकल्पनाऽऽधिक्यं नेति भावः ।

‡‡ येभ्य एवेति २ पु· पाठः ।

§§ मानान्तरदृष्टानर्थानविशिष्टार्थबुद्धेरिति २ पु· पा· ।

दीयते । तथा ऽहि यत एवानुमानभावमर्थापत्तिभावं वा समापन्ना दृष्टा विशिष्टार्थधियमादधाना यथा तथा चाधास्यन्ति तामेव तत्परैः* स्मारिताः सन्तः शब्दस्व†मापन्नाः । अनुपपत्तिसंबन्धमात्रप्रभावितं च तात्पर्यमुपपादकं न शक्तिमपेक्षते‡ गङ्गादिपदानां च काष्ठादीनां च तीरादौ पाकादौ च कल्पनाप्रसङ्गादित्युक्तम्§। न च सर्वत्र स्वार्थपरित्यागेनैव लक्षणेत्यैकान्तिकम् । लक्षणीयानुरोधेनैव हि सर्वत्र परिग्रहपरित्यागौ । तद्यथा गङ्गायां घोष इत्यत्र गङ्गापदेन घोषप्रतिवासार्हतीरलक्षणया स्वार्थस्य गङ्गायास्त्यागः । दण्डिनो गच्छन्तीत्यत्र तु दण्डवद्दण्डिषु समूहिषु लक्ष्यमाणेषु तदन्तर्गतस्याविशेषाद्दण्डिशब्दार्थस्य परिग्रहः । तथा वेदे सृष्टीरुपदधातीत्यत्र गणिकानां‖ लक्ष्यमाणत्वे तदन्तर्गतस्यापि सृष्ट्यर्थस्य परिग्रहः । एवमिहापि व्यतिषक्तावस्थायां लक्ष्यमाणायां तदन्तर्गतस्यार्थरूपस्यापि परिग्रहः तदग्रहे लक्ष्यमाणपरित्यागप्रसङ्गात्¶ । लक्षणालक्षणायोगादलक्षणेति चेद् न** । अलक्षणत्वात्†† । तत्रैतत्स्यात् । नेयं लक्षणा सा किलाभिधेयस्यार्थस्यायोग्यतया ऽनुपपद्यमाने वाक्यार्थसंबन्धे सति तत्संबन्धलब्धबुद्धिसन्निधौ वाक्यार्थसंबन्धार्हं भवत्यर्थान्तरे । तथा ऽऽह कश्चित् ।

> वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः ।
> तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥

---

* तत्पदैरिति २ पु॰ पाठः ।

† शब्दोपस्थितत्वप्रकारकानुसंधानविषयत्वम् ।

‡ पदार्थस्वरूपमात्रे ऽनुपपत्त्या सम्बन्धेन प्रतियोगित्वादिना च केवलमुपपादितं वाक्यार्थसंसर्गनिरूपितं तात्पर्यं पदे शक्तेर्गमकं न तामन्तराप्युपपत्तेरित्यर्थः ।

§ अन्वयांशे लक्षणामसहमानः सङ्कते ।

‖ तद्गणपठितानां सृष्टिशब्दरहितानामपि । शाबरभाष्ये अ॰ १ पा॰ ४ सू २७ ।

¶ संसर्गिणः पदार्थस्य परित्यागे संसर्गमात्रप्रतीतेर्निष्प्रयोजनत्वेन संसर्गस्यापि परित्यागप्रसङ्गादित्यर्थः ।

लक्ष्यमाणस्वार्थान्यपदार्थबोधकत्वघटितलक्षणालक्षणस्य स्वार्थसम्बन्धे ऽभावादित्यर्थः

लक्ष्यमाणस्य लक्षणालक्षणस्य प्रदर्शयिष्यमाणदूषणेनाव्यापकत्वादिति भावः

न चौदनं पचति चैत्रः पिठर इत्यादौ चैत्रपिठरादीनामर्थानां वाक्यार्थे संबन्धानर्हत्वम् । न च तल्लक्षितया ऽन्वितावस्थया अन्वयान्तरशालिता न चैवं लक्षणा तल्लक्षणविरहादिति* । तत्किमिदानीं न लक्षणेयमित्यनन्यलभ्यस्यापि शब्दार्थत्वमस्तु । न हि मासमग्निहोत्रं जुहोतीत्यत्राग्निहोत्रपदमलाक्षणिकमिति मुख्यं भवति । कर्मान्तरसादृश्येन गौण्या वृत्त्या तत्र प्रवृत्त्युपपत्तेर्न तदभिधानशक्तिकल्पनेति चेद् इहाप्युक्तया नीत्या ऽन्तरेणाप्यभिधानसामर्थ्यमन्वितावस्थाप्रतीत्युपपत्तेः कृतमभिधानशक्तितः । एवं तु न चेदियं पदप्रवृत्तिर्लक्षणा लक्षणमन्वेति भवतु तर्हि चतुर्थी दृष्टत्वाद् अस्तु वा लक्षणैव । नो खल्वेतल्लक्षणमप्रसिद्धवृत्त्यन्तरावतारप्रसङ्गात् । तस्मादेतदुक्तम् । तदिदमुच्यते गृह्णीमहे वाच्यानुपपत्तित इति संबन्धवशप्राप्तस्येति च† न पुनर्वाक्यार्थ संबन्धेति चान्वयादिति च । अस्ति चेहापि लोकानुसारतो विशिष्टार्थप्रत्यायनप्रयुक्तसमभिव्याहृतानामर्थरूपमात्रपरत्वे पदानामनुपपत्तिः अर्थरूपसंबन्धवशप्राप्तता‡ चान्वितावस्थायाः । व्यापकं चैतल्लक्षणं लक्षणानामनवयवेन§ वैदिकीनां च लौकिकीनां चेति चतुरस्रम् । अभिधार्पितत्वे च पदानां रूपमात्रप्रज्ञापने ऽपि न तेनोपपद्यते|| । अपि नाम पदानि साक्षाद्व्यापारेण बोधयन्त्यर्थान्वाक्यार्थमितये तद्बोधनैर्भिन्न वाक्यार्थं लक्षयिष्यन्ति । तदवस्थाभेदस्य तैः सहादृष्टचरत्वेन बुद्धावसंनिधानादलक्षणेति चेद् न । सामान्यतो¶ दर्शनात्पदार्थानां च तद्विशेषकत्वात् । नो खल्वन्वितेभ्यः पदार्थेभ्यो ऽन्यो ऽन्वितावस्थाविशेषः** । तथा चार्थस्वरूप-

* लक्षणायोपस्थिततीरादेः पश्चाद् बाधविषयत्वमिव प्रकृते लक्षितेन संसृष्ट स्वार्थरूपेण प्रयोजनसिद्धेः पुनरन्वयान्तरस्यानुपयोगादनवस्थाप्रसङ्गाच्चेति भावः ।

† इति शब्दः २ पु॰ नास्ति ।

‡ अर्थसम्बन्धवत् प्राप्तेति २ पु॰ पा॰ ।   § साकल्येन ।

|| स्वरूपमात्रोपस्थापनेन न परिसमाप्यते प्रयोजनवैकल्यादिति भावः ।

¶ अलक्षणानिवेशनसामान्यत इति २ पु॰ पा॰ ।

** तथा चेतरपदार्थान्वयेन विशेषरूपतामापन्नः संसृष्टोऽर्थः सामान्यविशेषभावसम्बन्धेन स्वरूपसम्बन्धीति तत्र लक्षणा युज्यत इति भावः । नो खल्वनन्वितेभ्यः पदार्थेभ्योऽन्यान्वितावस्थाविशेषेभ्यः इति २ पु॰ पा॰ ।

बोधनसामर्थ्याच्चाधिकं सामर्थ्यद्वयं* कल्पयिष्यते नाप्यभिधानशक्तेरेवान्व यविषयत्वम् अर्थस्वरूपमात्रगोचरत्वे ऽपि तत्प्रतीत्युपपत्तेः । यदि पुन प्रमाणसंशयविपर्ययेभ्यो विधान्तरा†नुपगमाच्च पदार्थबोधः‡ शब्दव्यापार जन्मोपेयते तर्हि स्मृतिरस्तु । न त्वेषा संस्कारोन्मेषमात्रप्रभवेति क्रृतमभि धातृभावेन पदानाम्§ । तदुन्मेषे तदुपयोग इति चेदुक्तार्थो ऽप्यालोचित स्वपदगोचरसंस्कारोद्बोधहेतुरिति सो ऽपि पदस्याभिधाता स्यात् तदिदमनभिधातृत्वमनधिगतान्वयबोधनएव कल्प्यते पदानां नान्यथा|| अथैवंवादी पृष्टो व्याचष्टां को नु खल्वयमभिधाव्यापारः शब्दान येनामी तदुक्ता ऽन्वयस्याभिधातारः । न तावत्परिस्पन्दस्तस्य मूर्तानुवि धायिनो द्रव्ये विभुनि विभुगुणे वा शब्दे मूर्त्यभावेनासंभवात् । असर्व गतद्रव्यपरिमाणं मूर्तिरिति हि पदार्थविदः¶ । नाप्यस्पन्दात्मा प्रयत्नादि रिवादृश्यमानः प्रमाणाभावात् । अन्वयधियश्च कार्यस्य सति संसर्ग संवेदने शब्दनिश्चयज्ञानादेवोत्पत्तेः** । तस्मात्स्वगोचरं विज्ञानमेव शब्द नां व्यापारः स्वार्थबोधे । यथा ऽऽह भगवान्भाष्यकारः†† । शास्त्रं शब्द विज्ञानादसन्निकृष्टे ऽर्थे विज्ञानमिति । स एव‡‡ स्वाभाविकशक्तिशालि शब्दस्य स्वशक्त्या अर्थधीहेतुतया अभिधेति गीयते । शब्दाभासस्यैन्द्रि कत्वे ऽपि रूपतः सामर्थ्यापधानेनाभिधात्वात्तस्य चातीन्द्रियत्वादतीन्द्रि

* प्रागुक्तं पदानामन्वयानुभवसामर्थ्यमर्थस्वरूपाणामन्वयानुभवसामर्थ्यं च आद्यस्यान्यथा ऽप्युपपद्यमानत्वादन्त्यस्य क्रृप्तत्वाच्चेति भावः ।

† विधानान्तरेति २ पु० पा० ।

‡ पदार्थानुभवः ।

§ पदानामभिधातृत्वेन पर्याप्तं तावन्मात्रेण प्रयोजनसिद्धेरिति भावः । पर्याप्तयोः क्रृतमित्यमरः ।

|| अर्थवादादिवाक्येषु प्राशस्त्यादेरशक्यत्वे ऽपि संसर्गस्य प्राथमिकशक्तिग्रहत ऽवगतत्वात्संसर्गत्वेन संसर्गस्य शक्यतेति भावः ।

¶ वैशेषिकदर्शनप्रशस्तपादभाष्यटीकायामुदयनाचार्यकृतायां किरणावल्यां स्पर्शप्रकरणे ।

** शब्दजन्यस्वार्थनिश्चयेनैवा ऽन्वयधिय उपपन्नत्वाद् व्यापारान्तरकल्पना ऽन तेति भावः ।

†† शाबरभाष्ये अ० १ पा० १ सू० ५ । ‡‡ स्वविषयकज्ञानरूपव्यापारः

यत्वमास्थिषतामिधायाः* । न चेयं साक्षादर्थधियमाधत्ते येन न तत्साधिका स्यात् अपि तु संस्कारोद्बोधनक्रमेण । तथा च नार्थविषयविज्ञानं स्वपदगोचरसंस्कारोद्बोधनक्रमेण पदस्मरणमपि† विदधदभिधाशब्दगोचरः अपि तु शब्दविषयं विज्ञानं तस्य च तद्भावनियमात्‡ । लौकिकपरीक्षकाणां प्रयोगसंप्रतिपत्तेः । प्रणिधानादिष्वपाठाच्छब्दस्य न स्मारकत्वमिति चेन्न । तत्संबन्धात् । अथापि§ स्यान्परिगणिता हि स्मृतिहेतवः|| । प्रणिधाननिबन्धनाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्माः प्रामाणिकैर्न चैतेषु किं चित्पदं तत्रार्थस्य स्मारकमिति चेत्तत्रार्थसंबन्धेन तदुपपत्तेः । संबन्धो हि स्मृतिहेतुषु पठितः । यतोऽन्तेवासिनो गुरुमृत्विजो याज्यं स्मरन्ति¶ । स चास्ति शब्दार्थयोरौत्पत्तिको वाच्यवाचकभाव इति तदनुभवाहितभावनासहितं शब्दविज्ञानमन्विताथप्रत्यायनप्रयुक्तं स्वार्थं स्मारयिष्यति । वाच्यवाचकत्वं च प्रत्याय्यप्रत्यायकत्वं तच्च विचार्यमाणं स्मार्यस्मारकत्वमेव । ननु सम्बन्धान्तरेणाध्यापकाध्यापनीयभावादिनाऽन्तेवासी स्मरति गुरुं न स्मारकत्वेनैव** तथेहापि सम्बन्धान्तरमनुसर्तव्यं न च तदस्ति तत्कथमस्य स्मारकत्वम् । अन्विताभिधाने त्वभिधेयसाहचर्यमेवास्यास्ति संबन्धान्तरमिति युज्यते

* शब्दगताभिधायाँ अर्थबोधानुकूलसामर्थ्यरूपायाः कृतो प्रविष्टस्यार्थस्यातीन्द्रियत्वेन तद्विशेषितसामर्थ्यस्याप्यतीन्द्रियत्वमास्थेयतइत्यर्थः ।

† पदस्मरणमपीति २ पु॰ पा॰ ।

‡ शब्दविषयकज्ञानेन नियमतोऽर्थप्रत्ययस्यैवार्थज्ञानेन पदस्मरणनियमाभावादर्थगतस्याभिधायकत्वपदोपस्थापकव्यापारस्य नाभिधात्वं नियमेनोपस्थापकव्यापारस्यैवाभिधात्वादिति भावः ।

§ शब्दस्य तत्स्मारकत्वमिति चेन्न तत्सम्बन्धादिति २ पु॰ पा॰ । अथापीत्यत्र तथापीति च ।

|| गौतमसूत्रे अ॰ ३ आ॰ २ सू॰ ४४ ।

¶ स्मारयिष्यन्तीति ३ पु॰ पा॰ ( ) एतच्चिह्नान्तर्गतस्थानस्थ पाठः ३ पु॰ नास्ति ।

** स्मार्यस्मारकत्वेनेवेति २ पु॰ पा॰ ।

स्मारकत्वं पदानाम् । अथान्विताभिधाने ऽप्यन्वितप्रत्यायनाय* किमस्ति संबन्धान्तरं पदानां दृष्टा हि चक्षुरादयो धूमादयश्चार्थसन्निकर्षलक्षणनियतसाहित्यादिलक्षणेन संबन्धान्तरेण प्रत्याययन्तो यथायथमर्थान् । यदुच्येत विना ऽपि संबन्धान्तरमौत्पत्तिकार्थप्रत्यायनशक्त्या वृद्धव्यवहारोन्नीतया प्रत्यायनमिति तदत्रापि समानम् । इहापि सादृश्यस्यैव स्मृतिजननशक्त्या वृद्धव्यवहारोन्नीतया स्मारकत्वमस्तु पदानामर्थरूपे तच्च स्वज्ञानमेव तस्य चाभिधात्वमुपपादितमधस्तात् । तस्मादभिधातृत्वमपि नान्विताभिधानइति† कल्पनालाघवादाकाङ्क्षादिलक्षणसहकारिप्रत्यासत्त्वैश्च समभिव्याहृतपदस्मारितैः पदार्थैः प्रत्यासत्त्या गम्यमानो वाक्यार्थो लाक्षणिकः शाब्दश्चेति‡ रमणीयम् । तस्मात्सुष्ठूक्तं§ पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि अथेदानीं पदार्था अवगताः सन्तो वाक्यार्थमवगमयन्तीति ॥

तत्त्वबिन्दुपरामर्शपुष्टानां बुद्धिवीरुधः ।
वाक्यार्थधीसुमनसः पुरुषार्थफलप्रदाः ॥
वाक्यार्थमितये पुंसां भ्रमसंतमसच्छिदा ।
इन्दुनेवामुना मार्गो दर्शितस्तत्त्वबिन्दुना ॥

इति श्रीवाचस्पतिमिश्रविरचितस्तत्त्वबिन्दुः समाप्तः ॥

* अन्वितानुभवनिष्पत्तये । सामान्यतोऽन्वितस्योपस्थितत्वेनानुभवविषयताया असंभवाद्विशेषस्य च सामान्याद्भिन्नत्वेन सम्बन्धान्तरानुपपत्तेरिति भावः ।

† अन्विताभिधानवादे प्रदर्शितदिशा पदानामन्विताभिधातृत्वं न सिध्यतीत्यर्थः ।

‡ संसर्गो लक्षणागम्यः स्वज्ञानादिपरंपरया पदजनितत्वेन शाब्दश्चेत्यर्थः ।

§ शाबरभाष्ये अ० १ पा० १ सू० २५ ॥